CC-0. In Public Domain. Digitization by eGangotri

वेदभाषानिघण्टुः

(कौण्डिन्न्यायनकोषः)

भूलोककाण्डान्तर्गतदेववर्गब्रह्मवर्गात्मकः सप्रस्ताविकः
शब्दानुक्रमणिकासहितः
निदर्शनरूपः

प्रणेता
शिवराज आचार्यः कौण्डिन्न्यायनः
आचार्यः, एम् ए., विद्यावारिधिः (पिएच्.डि), वाचस्पतिः (डि.लिट्.)

स्वाद्ध्यायशाला
२०५०

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वेदभाषानिघण्टुः

(कौण्डिन्न्यायनकोषः)

भूलोककाण्डान्तर्गतदेववर्गब्रह्मवर्गात्मकस् सप्रस्ताविकश्
शब्दानुक्क्रमणिकासहितो निदर्शनरूपः

प्रणेता

शिवराज आचार्य॑ कौण्डिन्न्यायनः

शाङ्करवेदान्ताचार्यः(त्रि.वि.वि.),साहित्याचार्यः(त्रि.वि.वि.), एम्.ए.(संस्कृते, त्रि.वि.वि.)
एम्.ए.(फिलोसफिविषये, आगरा.), आयुर्वेदशास्त्री(नेपाल.), विशिष्टशास्त्री(त्रि.वि.वि.),
विद्यावारिधिः(पिएच्.डि.;वाराणसीस्थ-स.सं.वि.वि.),वाचस्पतिः(डि.लिट्.;वाराणसी.)
काव्यप्रकाशस्स्य हैमवत्त्यास् संस्कृतव्याक्ख्याया रचयिता
कौण्डिन्न्यायनशिक्षाकारश् च

प्रमुद्द्रणसंशोधकाश् शब्दानुक्क्रमणिकायोजकाश् च सम्पादकाः

आमोदवर्धन॑ कौण्डिन्न्यायनः वेदाचार्यः
प्रियव्ँवदाम्बा कौण्डिन्न्यायनी इतिहासपुराणाचार्या
प्रमोदवर्धन॑ कौण्डिन्न्यायनः मीमांसाचार्यः
सुमोदवर्धन॑ कौण्डिन्न्यायनः वेदान्तशास्त्रिकक्क्षाच्छात्त्रः
सम्मोदवर्धन॑ कौण्डिन्न्यायनः
वशव्ँवदाम्बा कौण्डिन्न्यायनी
अतिसम्मोदवर्धन॑ कौण्डिन्न्यायनः

स्वाद्ध्यायशाला
२०५०

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रकाशिका
[नारायणी]देवी आचार्यानी

प्रथमसंस्करणम्, २५० पुस्तकानि
२०५०

मूल्ल्यम्–
भारतीयानि रूप्यकाणि २५।–
नैपालीयानि रूप्यकाणि ४०।–

ग्रन्थप्राप्तिस्स्थानम्-
स्वाद्ध्यायशाला
च.२/४१९, सरस्स्वतीमार्गः, लाजिम्पाट्
काष्ठमण्डपनगरम्-२
नेपालदेशः
दूरस्स्वनः ४१०३२७

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्रस्ताविका

"षडङ्ग-शास्त्रतेजोभिर् विशेषेणोज्ज्वलीकृते ।
वेदार्थज्ज्ञानरत्ने मे तृष्णाऽतीव विजृम्भते ॥"

भारतवर्षीय-ज्ञानविज्ञानविश्श्क्कोषरूपे महाभारते खलु मुनिरपि—

"ऊर्ध्वबाहुर् विरौम्म्येष न च कश्चिच् शृणोति मे ।
धर्मादर्थश् च कामश् च स किमर्थन् न सेव्व्यते ॥"[1]

इति रोरूयते ।

तत्र धर्मान् न केवलम् मोक्षः, किन् तु लोकैषणाप्रधानानामीप्सिततमौ अर्थकामौ अपि धर्मादेव सिद्ध्यत इति मुनेरभिप्प्रायोऽवगम्म्यते । अत एव धर्मस्स्य परम्परया मोक्षफलकत्त्वमपि एतेन वचनेनाऽपि सूच्च्यते। गणसङ्घातादयस् सामाजिक-राष्ट्रनीतिक-क्रियाकलापा अपि धर्माश्श्रयास् सन्त एव समेधन्त इति च तत्त्रैवा[2]ऽप्प्युक्तमिति सर्वथा धर्मᳲ पुरुषार्थेषु प्राथम्म्यम् भजते । धर्मे च—

चतुष्पात् सकलो धर्मो ब्राह्म्मणस्स्य विधीयते ।
पादावकृष्टो राजन्न्ये तथा धर्मो विधीयते ॥
धर्मो वैश्श्ये च शूद्द्रे च पादᳲपादो विहीयते ।
विद्द्यादेवव्ँविधेनैषाङ् गुरुलाघवनिश्चयम् ॥[3]

इति महाभारतवचनादपि ब्राह्म्मणैर् विशेषतोऽवधानङ् कर्तव्व्यम् ।

धर्मज्ज्ञानञ् चाऽस्मादृशानाव्ँ वेदादेव भवति । वेद-स्वरूप-प्रयोगा-ऽर्थ-रहस्स्य-सम्म्यग्ज्ञानमपि अस्मद्विधानां शिक्षादिभिष् षड्भिरङ्गैस् तदनुकूलया गुरुशिष्य्यपरम्-परया यथाविधि वेदाद्ध्ययनेन चैव भवति। तथा हिआचार्य- यास्कोऽपि "साक्षात्कृतधर्माण ऋषयो बभूवुस् तेऽसाक्षात्कृतधर्मब्भ्य उपदेशेन मन्त्रान् त्सम्प्रादुः, उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमङ् ग्रन्थं समाम्नासिषुर् वेदञ् च वेदाङ्गानि च"[4] इति वदन्नभिप्प्रैति।

उक्तयास्कवचनमनुसरद्भिरस्माभिष् षड्भिरङ्गैरञ्जितव्ँ वेदार्थञ् ज्ञातुमनुशीलयितुञ् च वेदाङ्गाद्ध्यद्ध्ययनेन तद्विषयकग्रन्थप्प्रणयनेन च प्रयत्नᳲ क्रियते। तत्र शिक्षा कल्पो व्याकरणन् निरुक्तञ् छन्दश्शास्त्रञ् ज्योतिषम् इति षड् वेदाङ्गानि। तेषु शिक्षाविषयेऽस्माभिᳲ प्रभूतव्ँ विचारितमस्ति, कौण्डिन्न्यायनशिक्षेति ग्रन्थश्च प्प्रणीतोऽस्ति। स च ग्रन्थो वाराणसीस्स्थेन सम्पूर्णानन्द-संस्कृत-विश्श्व-विद्द्यालयेन वाचस्पतिः (डि.लिट्.) इत्त्युपाधये

---

१. १८/५/६२ २. १२/१०७/१७ ३. १२/३५/३२,३३ ४. निरुक्ते १/६/४

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्वीकृतोऽस्ति । इदानीमेव चाऽयङ् ग्रन्थ॰ प्रकाशमागतोऽस्ति । कल्पविषये किञ्चिदद्ध्ययनङ् कृतमस्ति, गम्भीरतरमद्ध्ययनञ् च प्प्रारब्धमस्ति ।

व्याकरणे च पाणिनीयेऽनल्पो विचारो विहितोऽस्त्यस्माभिः । पाणिनीयव्याकरणपरिष्कारश् च कृतोऽस्ति । तस्स्य वेदपरकवँ व्याक्ख्यानञ् च करिष्ष्यमाणमस्ति । निरुक्तमपि यास्कप्प्रणीतवँ विशेषेणा ऽधीतम् । पिङ्गलकृतञ् छन्दश्शास्त्रमप्प्यधीतम् । तस्स्यापि च्छन्दस्तत्त्वप्रकाशनपरवँ व्याक्ख्यानमुपक्क्रान्तम् । लगधकृतवँ वेदाङ्गज्योतिषञ् च सङ्गृहीतम् , अनल्पञ् चिन्तितम्, तदनुशीलनप्प्रचाराय अद्ध्येतुकामेब्भ्यो नयराजपन्तादिब्भ्यो दुर्लभ-पुस्तकप्प्रतिलिपि-सौविद्ध्यादिकञ् च दत्तम् (द्र. पूर्णिमा ३४, पृ. ८५) । सुधाकरद्विवेदिप्प्रभृति-वेदपरिचयरहितवैदिकयज्ञादिकर्मकाण्ड-विमुखाऽनावश्श्यकपाठभेदकल्पक-माघतपोविवेकादिविधुर- नयराजपन्तान्तै॰ कृतवँ व्याक्ख्यानम् परिभाव्व्य युक्ततरन् तद्व्याक्ख्यानञ् च करिष्ष्यते । सव्व्याक्ख्यानानावँ वेदमन्त्र-संहिताब्राह्म्मणादिग्ग्रन्थानाम् पारायणञ् चाऽनल्पङ् कृतमस्माभिः, अधिकतरङ् करिष्ष्यते च।

तत्त्र निरुक्तस्स्थानीयोऽयङ् ग्रन्थश् चाऽधुना प्रणीयमानोऽस्त्यस्माभिः । अस्स्य ग्रन्थस्स्य निघण्टु-भागो विनेयानाम् पौगण्डे वयसि वर्तमानानामस्माकम् पुत्त्राणाम् पठनायाऽपि प्रथममावश्श्यकोऽभूदिति अस्स्य रचनायै अस्माभि॰ प्रथमं समयो दीयते । तत्त्र भूलोककाण्डमिदानीन् निष्पन्नप्प्रायमस्ति । तत्त्र निरुक्तमिति निघण्टोर् व्याक्ख्यानमेवोच्च्यत इति के चिन् मन्न्यन्ते, तथापि सव्व्याक्ख्यानो निघण्टुरेव निरुक्तमिति सम्प्रदायविदो विद्वांस॰ प्रतिपादयन्ति । अतोऽस्माभिरपि निरुक्तस्स्थानीयेऽस्मिन् ग्रन्थे निघण्टुभागो व्याक्ख्यानभागश् च निवेश्श्यते ।

तत्त्र निघण्टुभागे यथाऽऽचार्ययास्कव्याक्ख्याते निघण्टौ कतिपयानान् दुर्ज्ञानार्थानान् देवतादिविशिष्टार्थकानामेव च शब्दानां सङ्ग्रह॰ कृतः, न तथाऽत्त्र तादृशानामेव शब्दानां सङ्ग्रह॰ कार्यः, किन् तु प्रायस् सर्वेषावँ वेदलोकसाधारणानावँ वैदिकानालँ लौकिकानाञ् च शब्दानाम् अमरकोषादिलौकिकशब्दकोष-रीत्त्या सङ्ग्रह॰ कार्यः । मूलेऽनिवेश्श्यानामपि आवश्श्यकानां शब्दानावँ व्याक्ख्याने यथास्स्थानं सङ्ग्रह॰ करिष्ष्यते । तत्त्राऽपि वेदेषु वेदाङ्गेषु च प्रयुक्तानां शब्दानां सङ्ग्रहेऽत्त्र मुक्ख्यतया प्रयास॰ करिष्ष्यते ।

अस्स्य ग्रन्थस्स्य व्याक्ख्यानभागश् च तथा रचयिष्ष्यते यथा तस्स्याऽद्ध्ययनेन स्कन्दस्स्वामि-दुर्गाचार्य- देवराजयज्व-महेश्श्वरादिव्याक्ख्यान-निरुक्तश्लोकवार्त्तिकादि-सहितनिरुक्तस्स्याऽद्ध्ययनमपि प्रायो गतार्थं स्यात् , वैदिकवाङ्मयस्स्य महत्त्वपूर्णानान् निखिलानाम् प्रमेयाणां सङ्क्षिप्त॰ प्रामाणिकश् च परिचय॰ प्राप्तस् स्यात् , तेषाम् प्रमेयाणामधिकतराय ज्ञानाय निश्चितास् सूचनाश् चोपलब्धा भवेयुः, अमरकोषव्याक्ख्यासुधादिब्भ्य इव न केवलं शब्दानावँ व्युत्पत्तय एव, किन् तु आवश्श्यकस्स्थले मूलप्प्रयोगस्स्थलनिर्देशसहिता॰ प्रयोगा अपि ज्ञाता भवेयुः । एवञ् चाऽकारादिवर्णानुक्क्रमेण सन्निवेशितानां शब्दानामनुक्क्रमणिकया परि-शिष्टरूपया सहितोऽयङ् ग्रन्थो न केवलवँ वेदभाषावाङ्मयस्स्य निरुक्तं शब्दकोषो वैव, किन् तु अल्पधनानामपि सुलभस् सुप्प्रयोगश् च वैदिकसँस्कृतिविश्श्वकोषोऽपि भविष्ष्यति ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अस्स्य ग्रन्थस्स्य निघण्टुभागस्स्याऽब्भ्यासेन च यथाऽमरकोषाद्यब्भ्यासेन लौकिकसँस्कृतकाव्व्यादीनामद्ध्ययने साहाय्यम् भवति, तथैव न केवलवँ वेदाङ्गस्स्मृतिपुराणलौकिककाव्व्याद्ध्ययने, किन् तु ऋग्वेदाद्यद्ध्ययनेऽपि महत् साहाय्यम् भवति । एवञ् च पाणिनीयव्याकरण-जैमिनीयधर्ममीमांसादिसिद्धान्तानुसारं सत्त्यपि औत्सर्गिके वैदिकलौकिकसँस्कृतभाषैक्क्ये वेदाद्ध्ययनविमुखानाङ् कातन्त्रपाणिनीयव्याकरणैकदेशाऽमरकोषादिकोषस्मृतिपुराणलौकिककाव्व्यादिमात्त्रपाठिनावँ वैदिकलौकिकसँस्कृतभाषाभेदब्भ्रमोऽपि अनेन ग्रन्थेन निराकरिष्व्यते ।

सम्पूर्णस्स्य सँस्कृतवाङ्मयस्स्याऽद्ध्ययनेऽनेन ग्रन्थेनोल्लेक्ख्यवँ विशिष्टञ् च साहाय्यवँ विधास्स्यत इति एतावता स्पष्टम् बोद्धुं शक्क्यम् ।

एतस्मिन् ग्रन्थे काण्डवर्गविभाग एवम् भविष्व्यति—

१. भूलोककाण्डे— देव-ब्रह्म्म-क्षत्त्र-विश्श्य-शौद्द्र-मानुष-पूः-पशु-पक्षि-सरीसृप-कीट-वन-पानीय-पर्वत-भूवर्गाः,

२. अन्तरिक्षकाण्डे— देवता-व्योम-दिग्वर्गाः,

३. द्युलोककाण्डे— देवताति-लोकवर्गौ,

४. सामान्न्यकाण्डे— धी-काल-शब्द-नाट्ट्य-समूह-विशेष्व्यनिग्घ्न-सङ्कीर्ण-नानार्थाऽव्यय-लिङ्गादिसङ्ग्रहवर्गाः,

५. परिशिष्टकाण्डे—स्वर्ग-समय-विद्या-पूजाद्याचार-पाताल-नरकवर्गाः,

६. आक्ख्यातकाण्डे— ब्रह्म्मचेष्टा-क्षत्त्रचेष्टा-विश्श्यचेष्टा- शौद्द्रचेष्टा-मनुष्व्यचेष्टा-भावविकारा-ऽन्तःकरणवृत्ति-वाक्क्रिया-ध्वनिक्क्रिया-प्रकीर्णक्क्रिया-सनाद्यन्तक्क्रिया- नानाकर्मक- क्क्रियोपग्ग्रहवर्गाः ।

तत्त्र भूलोककाण्डान्तर्गतौ समङ्गलपाठौ देववर्ग-ब्रह्म्मवर्गाविमौ निदर्शनरूपौ सामान्न्यतयैतद्ग्रन्थविषये विशेषतश् चैतद्वर्गविषये विदुषावँ विचारानुपलब्भ्यैतङ् ग्रन्थमधिकतरमुपयोगिनङ् कर्तुं शक्नुयामेति विचारार्थवँ विदुषामग्ग्रत उपस्स्थापयामः ।

एतयोः प्रस्तूयमानयोर् वर्गयोर् वैशिष्ट्ययँ यद्यपि विद्वांसस् स्वयमेव भोत्स्यन्ते, तथापि विदुषान् ध्यानमाक्रष्टुङ् किञ् चिद् भणामः ।

तत्त्र मङ्गलपाठे परब्ब्रह्म्मणः कार्यब्रह्म्मणश् च नामान्न्येव निवेशितानि ब्रह्म्मणस् सर्वमङ्गलाधारत्त्वात्, तन्नाम्नाङ् कस्मिन्नपि वर्गे निवेशयितुमनुचितत्त्वात्, लाघवकारणाच् च । देववर्गे च यास्ककृतनिरुक्तोक्तानाम् भूलोकस्स्थानावँ वैदिकानान् देवानान् तत्सम्बद्धानाञ् च केषाञ् चित् पदार्थानान् नामानि सङ्गृहीतानि सन्ति । ब्रह्म्मवर्गे च ब्राह्म्मणत्त्वस्स्य ऋषिमूलकत्त्वाद् गोत्त्रप्प्रवर्षीणाम् प्रथमम्, ततोऽन्न्येषाम् महत्त्वपूर्णानामृषीणाम् मुनीनाञ् च, ततो ब्राह्म्मणानावँ विदुषामद्ध्येतृविशेषाणाम्, तत उपनयनादीनाम् आश्श्रमविशेषसम्बद्धानाम्

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पदार्थानाम् प्रायेण साङ्गोपाङ्गानान् नामानि सङ्गृहीतानि सन्ति । उपर्युक्ता विषयव्यापकता पदार्थ-विशेष-क्रमगत-विशेषता वाऽमरसिंहकृतनामलिङ्गानुशासन-यादवप्रकाशकृतवैजयन्त्या-ख्यनाममाला-पुरुषोत्तमदेवकृतत्रिकाण्डशेषहारावली-भोजदेवकृतनाममालिका- हलायुधकृताभिधान-रत्नमाला-हेमचन्द्रकृताऽभिधानचिन्तामणि-धनञ्जयकृतनाममालिका-हर्षकीर्तिकृतशारदीयनाममाला-ऽभिनवबाणभट्टकृतशब्दरत्नाकर- विश्श्वनाथकृतकोशकल्पतरुप्रभृतिषु पूर्ववर्तिषु शब्दकोशेषु कुत्राऽपि नैव प्राप्यते ।

अस्मदीयब्रह्मवर्गस्योक्तवँ वैशिष्ट्यं स्फुटीकर्तुममरकोष-ब्रह्मवर्गालोचनं सङ्क्षेपेण प्रस्तूयते । अमरकोषब्रह्मवर्गे कोऽपि पदार्थनामनिवेशनस्य समुचितᳶ क्रमो न दृश्श्यते । तत्र स्थालीपुलाकन्यायेनोदाहरणानि यथा-“लब्धानुज्ञस् समावृत्तः” इति दशमे श्लोकेऽस्ति,“स्नातकस् त्वाप्लुतो व्रती” इति तु त्रिचत्त्वारिंशत्तमे श्लोके; यष्टुस् तद्विशेषाणाञ् च नामानि सप्तमाष्टमनवमश्लोकेषु सन्ति,“सुत्त्वा त्वभिषवे कृते” इति तु व्यवहिततया दशमान्ते,“चितवानग्निमग्निचित्” इति च तथैव त्रयोदशे; यज्ञनामानि त्रयोदशे श्लोके, अवभृथस् सप्तविंशे, दर्शपूर्णमासौ त्वष्टाचत्त्वारिंशत्तमे । “जन्न्यास् स्निग्धा वरस्स्य ये” इति ब्रह्मवर्गस्स्य समापनमपि अमरकोषकारस्य पदार्थनामनिवेशनक्क्रमविशेषे औदासीन्न्यं स्फुटङ् करोति। अमरकोषब्रह्मवर्गे पदार्थविवरणेष्वपि त्रुटय उपलभ्यन्ते। तथा हि पञ्चमहायज्ञविवरणे (श्लो.१४),“प्राग्वंशः प्राग्हविर्गेहात्” इत्त्यत्र (श्लो.१६),“ऋक् सामिधेनी धाय्या च या स्स्यादग्निसमिन्धने”इत्त्यत्र(श्लो.२२), “मृतार्थन् तदहे दानन् त्रिषु स्यादौर्ध्वदेहिकम्”इत्त्यत्र (श्लो.३०), “पाद्यम् पादाय वारिणि” इत्त्यत्र(श्लो.३३), “क्रमादातित्थ्याऽऽतिथेये अतित्थ्यर्थेऽत्त्र साधुनि”इत्त्यत्र(श्लो.३३), “समे तु पादग्ग्रहणमभिवादनमित्त्युभे” इत्त्यत्र(श्लो.४१) चेत्त्यादिषु स्थलेषु अमरकोषवचनानां श्रुति- कल्पसूत्र-व्याकरण-स्मृत्त्याचारादिभिस् सह विसवँवादः स्फुटः। यद्यपि अस्माभिरपि अमरकोषवचनादेव तर्मपदं सङ्गृहीतम् , तथापि “यूपाग्ग्रन् तर्म”इत्त्यत्र(श्लो.१९) तर्मपदं सन्देहास्पदम्। तर्द्द्मपदन् तु वेदे,श्रौतसूत्त्रे चोपलभ्यते। “आमिक्षा सा शृतोष्णे या क्षीरे स्स्याद् दधियोगतः”(श्लो.२३) “सान्नाय्यं हविः” (श्लो.२७) इत्त्यादिषु पदार्थस्स्याऽस्फुटत्त्वम् , दर्शपूर्णमासयोस् सम्भूयकारित्त्वेऽपि तयोर् “यागौपक्षान्तयोः पृथक्”(श्लो.४८) इति स्वतन्त्रत्त्वेनेव प्प्रतिपादनम्, “दर्शश् च पौर्णमासश् च” (श्लो.४८) इति प्रयोगक्क्रमत्यागः, “राजबीजी राजवंश्यः” (श्लो.२) इत्त्यस्स्य क्षत्त्रवर्गे पठनीयस्स्यापि ब्रह्मवर्गे पाठश् चेत्त्यादयो दोषा अमरकोषब्रह्मवर्गे द्रष्टव्याः।

उपर्युक्तेषु विषयेषु अस्मत्कृतब्रह्मवर्गस्स्थम् प्रतिपादन-वैशिष्ट्यङ् क्रमेण तलसङ्केतितेषु श्लोकेषु दृश्श्यम्— १८४-१८९,४१४-४१५, ३४४-३४५, ६०९, १९३, १९२, ११३-११७, ३८८, ३७१, ३७०, ३२७ । ब्राह्मणस्स्य शब्दतोऽर्थतश् च वेदमूलकत्त्वेऽपि अमरकोषब्रह्मवर्गे वैदिकयज्ञादिसम्बद्धानाम्पदार्थानान्नाम्नामल्पानामेव सङ्ग्रहो यदृच्छया स्थपत्त्यादीनाङ् केषाञ्चिदुपेक्क्षणीयानामपि पदार्थानान् नाम्नां सङ्ग्रहोऽन्न्येषामनुपेक्षणीयानामपि अग्निहोत्त्रादिपदार्थानान् नाम्नामसङ्ग्रहश् चेति तत्त्र महान् दोषः। सङ्क्षेपरुचीनामद्ध्येतॄणाम् प्रचलितकर्मकाण्डकथा-पुराणलौकिककाव्यादिमात्त्रपठनपराणामुपकाराय बृहदमरकोषस्स्याऽनैपुणेन सङ्क्षिप्तीकरणादेते

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दोषास् तत्त्राऽऽगतास् स्युरिति सम्भाव्व्यते। एते च सर्वे दोषा अस्माभिस् तु अस्मदीयब्रह्म्मवर्गो यथाशक्ति परिहृताः। उक्तदोषरहिता अन्न्यतन्त्राणि समाहृत्त्य सङ्क्षिप्तीकृत्त्य प्रतिसँस्कृत्त्य च रचितैर् वर्गैर् घटितस्स्य अमरकोषस्स्य श्लोकाश् श्लोकार्धाश् श्लोकांशा वा तु यथास्थानमस्माभिरत्त्र परिगृहीताः।

यद्द्यपि वैजयन्ती-ब्राह्म्मणाद्ध्यायेऽमरकोषब्रह्म्मवर्गापेक्षया युक्ततरः पदार्थनामनिवेशनक्क्रमो ऽधिकतरपदार्थनामसङ्ग्रहश् चोपलभ्भ्यते, तथापि तत्त्राऽपि पदार्थनिवेशनक्क्रमगताः पदार्थनामसङ्ग्रहगताश् च त्रुटयो ऽस्मत्कृतब्रह्म्मवर्गेण सह तुलनया तस्स्याऽद्ध्ययने कृते विदुषाङ् कृते सुस्स्पष्टा भविष्यन्त्येव। अमरकोषब्रह्म्मवर्गे ५८ श्लोकाः, वैजयन्तीब्राह्म्मणाद्ध्याये २४० श्लोकाः, अस्मदीये ब्रह्म्मवर्गे ६७१ श्लोका इति एतेषाङ् कोषाणाम् महदन्तरं सुखेन बोद्धुं शक्क्यम्।

अस्मदीयायां रचनायाङ् क्वचित्क्वचिद् वृत्तस्स्य दुश्श्रवत्त्वँ वर्तत इति जानीमहे, तथापि तादृशन् दुश्श्रवत्त्वम् अमरकोषेऽन्न्यत्त्राऽपि शास्त्रीयग्रन्थेषु कात्त्यायनकृतश्लोकवार्त्तिकादिषु अपि प्राप्प्यतयिति पदविशेषसन्निवेशस्स्याऽपरिहार्यतयाऽऽगतमेतन् दोषन् न गणयिष्य्यन्ति विवेकशीला इत्त्याशास्महे। अन्न्यास् त्वस्मदीयास् त्रुटीस् स्फुटन् निर्दिश्श्य ता निराकर्तुम् अस्मानुद्बोद्ध्य चाऽस्मदीये वेद-वेदाङ्ग-स्मृति-पुराणादि-वाङ्मयानुशीलनस्स्य, वैदिकसनातनवर्णाश्श्रमधर्मस्स्य, वैदिकशिक्षापद्धतेश् चाऽनुपालनस्स्य प्रयत्ने साहाय्यँ विधाय अस्माननुगृह्ण्णन्तु, एतङ् ग्रन्थं सम्पूर्णदेववाणीवाङ्मयानुशीलनायाऽधिकतरोपकारकङ् कर्तुं साहाय्यन् दत्त्वा वैदिकसनातनवर्णाश्श्रमधर्म- वैदिकशिक्षा पद्धत्त्यनुयायिनामुपकारञ् च कुर्वन्तु वेदवेदाङ्गस्मृतिपुराणादिविद्द्यासु अभियुक्ताः कृतबुद्धयो दयालवस् सज्जना इति तत्त्र भवतो विद्वत्तल्लजान् भूयोभूयः प्रार्थयामहे।

व्याक्ख्यानवँ विना अस्मदीये ब्रह्म्मवर्गे निवेशितानां सर्वेषाम् पदानामर्था इदानीन्तनानाम् प्रचलितकर्मकाण्डकथापुराणलौकिककाव्व्यादिमात्त्रपठनपराणां शास्त्रविशेषप्प्रकरणग्रन्थतदेकदेशादिकमधीत्त्यैव स्वङ् कृतकृत्त्यम् मन्न्यमानानाम् धर्ममीमांसा-ब्रह्म्ममीमांसा-व्याकरण-ज्योतिष-स्मृतिशास्त्र-न्याय-वैशेषिक-साङ्ख्ययोग-तन्त्रादिग्रन्थ-विशेषमात्त्रपठनपराणां संस्कृतज्ज्ञानाङ् कृते सुबोधा नैव भविष्यन्तीति च जानीमहे। तथापीदानीं सर्वविधानुकूल्ल्याभावाद् व्याक्ख्यावँ विनैव निदर्शनरूपोऽयङ् ग्रन्थांशः प्रकाश्श्यते।

अत्त्र दृश्श्यमानल्ँ लौकिकसँस्कृतभाषाया लिखिते प्रयोगे दुर्लभमपि मौखे प्रयोगे प्रायेण निरपवादम् प्राचीनेषु शिलालेखेष्व्वपि स्थानेस्थाने[1] दृश्श्यमानं स्वरमद्ध्यस्स्थसयँयुक्तव्यञ्जन-

१. रुद्द्रदाम्नो गिरनारशिलालेखे ७२तमे शकाब्दे उत्कीर्णे 'सुप्प्रतिविहितप्प्रणाली' इत्त्यत्त्र राज्ज्ञस् सोमस्स्य २८२तमे वैक्क्रमेऽब्दे उत्कीर्णे राजस्थानसहाराजनपदनांदसाग्रामशिलालेखे चैत्त्र-सत्त्र-मात्त्र- समुद्धृत्त्या-ऽऽवृत्त्य-सत्त्व-चित्त्य-पुष्करप्प्रतिलम्भादिपदेषु, समुद्द्रगुप्तस्स्य प्रयागाभिलेखे अद्ध्येय- पराक्क्रम-साद्ध्वसाधु-काव्यक्क्रिया-लोकसमयक्क्रिया-विक्क्रमादिपदेषु, वत्सभट्टिकृते मद्ध्यप्रदेशस्स्य- मन्दसौर(दशपुर)- पट्टवायश्श्रेण्ण्यभिलेखे च यत्त्र-स्वाद्ध्याय-पत्त्य-रोद्ध्रादिपदेषु, वैण्ण्यगुप्तताम्म्रपट्टाभिलेखे च पात्त्र-यत्त्र-क्षेत्त्रादिपदेषु अन्न्यत्त्र च व्यञ्जनविशेषद्वित्त्वप्प्रवृत्तिर् दृश्श्यते।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

द्वित्वप्प्रयोगम् , अस्मदीयब्रह्मवर्गस्याऽन्ते स्थितानाङ् कतिपयानां श्लोकानाल्ँ लेखने प्रयुक्तङ् कुत्रचित्कुत्रचिन्नवीनप्प्रकारकमपि सयुँयुक्तव्यञ्जनस्य पूर्वाक्षराङ्गतायाः पराक्षराङ्गतायाश् च प्प्रायेण सूचकम् , "क्ष-ज्ञ"-रूपाधुनिकलेखोच्चारणसंशोधनबुद्धिजननसहायकम् सरलतया याथार्थ्येन च वर्णानुपूर्वीप्रदर्शकञ् चेति युक्तियुक्ततरल्ँ लिपिप्प्रयोगञ् च सम्म्यग् विमृशन्तु सज्जना विद्वांसः ।

अमरकोषस्थानापन्नयुक्ततरकोषाब्भ्यासरसिका जनास् स्थूलया लिप्प्या मुद्द्रितान् श्लोकानेवाऽब्भ्यस्स्यन्तु; वैदिककर्मकाण्डादिष्ष्वपि कामपि रुचिन् दधतस् तु जना मद्ध्यमया लिप्प्या मुद्द्रितानपि श्लोकानब्भ्यस्स्यन्तु; वैदिककर्मकाण्डादीनाव्ँ विषयाणाञ् ज्ञाने विशिष्टां रुचिन् दधतस् तु जनास् सूक्ष्मया लिप्प्या मुद्द्रितानपि श्लोकानब्भ्यस्स्यन्तु इति विचार्य श्लोकानाम् मुद्द्रणे लिपिभेद आश्श्रितो वर्तते । एतस्मिन् विषयेऽपि समालोचकैरवधानन् देयम् ।

भूमण्डले स्वकीयसैनिकार्थिकबलश्श्रेष्ठतया सह स्वकीयान् धार्मिकसांस्कृतिकश्श्रेष्ठतामपि निराबाधतया स्थापयितुमिच्छुकैः परचक्क्रिभिस् तत्कृपाभाजनताल्ँ लब्धवद्भिस् तदनुजीविभिर-स्मदीयैश् च कैश् चिद् विवेकशिथिलैर् जनैर् भारतवर्षीयवैदिकसनातनवर्णाश्श्रमधर्मस्स्य तन्मूलभूताया वेदवेदाङ्गादिशिक्क्षायाश् चोन्मूलने क्रियमाणे तत्प्रतीकाराय यथाशक्ति चेष्टमानैर-स्माभिर् वैदिकशिक्क्षायाः प्रचाराय वैदिकसनातनवर्णाश्श्रमधर्मस्स्य रक्क्षणाय चाऽपि प्रयत्नोऽयव्ँ विशेषतश् च प्प्रारब्धोऽस्ति ।

तत्र यास्क-पाणिनि-कात्त्यायन-पतञ्जलि-वररुचि-भर्तृहरिप्प्रभृतिभिश्श्रेष्ठैर्भारतवर्षीयैर् भाषाव्याकरणविद्भिराविष्कृतस्स्य व्याक्ख्यातस्स्य च शाश्श्वतस्स्य भाषाव्याकरणसिद्धान्तस्स्य तिरस्कारङ् कृत्वा पाश्चात्त्यगतानुगतिकतया कृतस्स्य नैपालीयभाषाव्याकरणस्स्य राजाज्ञाबलेन कृतस्स्य क्रियमाणस्स्य च प्प्रचारस्स्य विरोधे ग्रन्थानाव्ँ विरचनप्प्रकाशनप्प्रचारणैः, नेपालदेशे २०११तमाद् वैक्क्रमाब्दात् प्रभृति शासकैः प्रारब्धस्स्य वेदवेदाङ्गादिसंस्कृतशिक्क्षामूलोन्मूलनकार्यस्स्य प्प्रतिरोधस्स्य प्प्रयासेन; वैदिकधर्मदर्शन-वेदवेदाङ्गस्मृतिपुराणादिशास्त्र ज्योतिषायुर्वेदादिप्राच्च्य-विज्ज्ञान-वैदिकराष्ट्रनीत्त्यादिसार्वलौकिकज्ज्ञानसंरक्षणप्प्रचारणपर-बहुमुख-संस्कृतविद्द्यालय-संस्थापनसञ्चालन- प्प्रयासेन; स्वपुत्त्राणाव्ँ वैदिकसनातनवर्णाश्श्रमधर्मानुसारिण्ण्यां शिक्क्षायाम् प्रवर्तनेन, वैदिकसदाचारे स्थिरीकरणेन; स्वस्स्य कुले समाजे ग्रामे देशे सम्पूर्णे भारतवर्षे च वैदिकसनातनवर्णाश्श्रमधर्मस्स्य तदनुकूलशिक्क्षायाश् च प्प्रचारे यथाशक्ति क्क्रियमाणेन प्प्रयासेन चाऽयम् प्रयत्नोऽस्माभिः प्रवर्त्यमानोऽस्ति ।

अयम् प्रयत्नो वैदिकसनातनवर्णाश्श्रमधर्मानुयायिभिर् भारतवर्षवासिभिस् सर्वैर् जनैस् तदनुकूलैरन्न्यैश् च साहाय्यकरणेन सफलीकरणीय इति प्प्रार्थयते—

माघशुक्लषष्ठ्याम्, २०४९तमे वैक्क्रमेऽब्दे शिवराज आचार्यः कौण्डिन्न्यायनः ।
स्वस्स्य त्रिपञ्चाशत्तम्म्याञ् जन्मतिथौ
भारतवर्षान्तर्गते हिमवत्खण्डस्स्ये नेपालप्प्रदेशे काष्ठमण्डपनगरे॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अथ वेदभाषानिघण्टुः

तत्त्रादौ मङ्गलपाठः

ओम् ब्रह्म्म खम् परञ् ज्योतिरक्षरङ् कं सदव्व्ययम् ।
ऋतं सत्त्यञ् ज्ञानमनन्तं स्वयम्भ्वमृतम् बृहत् ॥ १॥
किन् तद् यद् व्योम भुवनम् भविष्यद् भूतमक्षितम् ।
अम्बरं सदनं हेमाऽन्तरिक्षं हृदयम् मनः ॥२॥
प्राण आनन्द आकाशो भूमा ज्ञ४ पुरुषोत्तमः ।
परात्मा चिज् जगद्योनिश् शास्त्रयोनिश् च सर्ववित् ॥३॥
अन्तर्यामीट् च धातेन्द्रश् श्यामो मायापति४ प्रभुः।
ब्रह्म्मा हिरण्ण्यगर्भोऽग्निर् ब्रह्म्मलोकपतिस् स्वभूः ॥४॥
सर्वेश्श्वरस् सहस्राक्ष४ पुरुषो विश्श्वतोमुखः ।
प्रजापतिर् विश्श्वरूपो विराड् वैश्श्वानरो मनुः॥५॥
यज्ज्ञस् सोमो रयिर् हंसो वेनश् शम्भुर् विभु४ कृमिः।
इन्दू राभुर् भूमिरापस् समुद्द्रस् सिन्धुरर्णवः ॥६॥
शबलस् सगरो वृक्षो नाभिर् वह्न्निर् भव४ कविः ।
वरुणो नृमणा नारायणो मित्त्रश् च चित्पतिः॥७॥
देवज्ज्येष्ठस् सर्वदेवो विश्श्वकर्मा बृहस्पतिः।
दशहोता सप्तहोता षड्ढोता पञ्चहोतृकः॥८॥
चतुर्होता चतुर्हूतोऽजोऽक्षितिर् भरतस् तुथः।
विष्णुर् धर्मो हरी रुद्द्रो वायुस् सूर्यो यमस् समः॥९॥
पुराणपुरुषो भास्स्वान् शिपिविष्टस् सनातनः।
हृषीकेश४ पशुपति४ परमेष्ठी महामखः ॥१०॥
आपिस् स्वापिश् चाऽपिजोऽहर्पतिश् चैव क्क्रतुर् वसुः।
अहोमुग्धो मुग्धवैनंशिनश् चाऽपि विनंशिकः॥११॥
आन्त्यायनस् स्यादान्त्यो भौवनश् च भुवनस्स्य च ।
पतिश् चाऽधिपतिस् सवँवत्सरयज्ज्ञप्प्रजापतिः॥१२॥
बृहदुक्षोऽच्च्युतो विप्प्रस् स्रष्टा दक्क्षश् च वाक्पतिः।
महोदेवो नृचक्क्षाश् च वसिष्ठश् च वृषाकपिः॥१३॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अथ भूलोककाण्डम्

तत्रादौ देववर्गः

अग्निस् तु जातवेदास् स्यात् सूक्ते वैश्श्वानरोऽपि सः।
द्रविणोदाश् च दहनो वीतिहोत्रो धनञ्जयः॥१॥
वह्निन्नः कृपीटयोनिश् च बर्हिश् शुष्मा तनूनपात् ।
शोचिष्केशः कृष्णवर्त्त्मा शमीगर्भ उषर्बुधः॥२॥
आश्श्रयाशो बृहद्भानुः कृशानुः पावकोऽनलः।
रोहिताश्श्वो वायुसखश् शिखावानाशुशुक्क्षणिः॥३॥
हिरण्ण्यरेता हुतभुग् ज्वलनो हव्व्यवाहनः।
सप्तार्चिर् दमुनाश् शुक्क्रश् चित्त्रभानुर् विभावसुः॥४॥
धूमद्ध्वजश् छागयानश् शुचिरप्पित्तमेव च ।
जागृविस् सप्तजिह्व्वश् च निपीथो मन्त्रदीधितिः ॥५॥
शुन्ध्युः पतङ्गो वीद्ध्रोऽर्क्को गन्धर्वो महिषोऽङ्गिराः।
ब्रह्म्मकेशी हरी रुद्द्रस् शर्वः पशुपतिस् तथा ॥६॥
उग्ग्रो विश्श्वम्भरो महान्देव ईशानको भवः।
कुमारश् चाऽशनिश् चित्त्रोऽसितग्ग्रीवः पृथुर् हवः॥७॥
केता च स्स्वर्णघर्मश् च स्वर्णार्कस् स्वर्णशुक्क्रकः।
स्वर्णज्ज्योतिस् स्वर्णसूर्यः पवमानश् च पावनः॥८॥
सहुरिश् च त्त्रिधामा च सृदाकुर् भरथः पचिः।
छत्त्र्यक्क्रो यवसादश् च ज्योतिस् सूर्योऽरुषोऽपि च ॥९॥
भ्रजो भुवस् तथा सोमो नृपतिर् नृषदप्सुषद् ।
सरस्स्वती च सविता तथा पूषा बृहस्पतिः ॥१०॥
ऋताषाद् सहसस्पुत्त्रश् शितिग्ग्रीवश् च सुक्षितिः।
स्याद् धर्मणस्पतिः पुंसि तथा स्यादङ्गिरस्तमः॥११॥
स्कन्धाग्निस् स्थूलकाष्ठाग्निः कुकूलो मुर्मुरस् समौ ।
दावानलो दवो दावः करीषाग्निस् तु च्छागणः॥१२॥
तेजनाग्निस् तृणोल्का च तृणमुष्ट्यनलो मतः।
सवँर्वर्तकस् तु स्स्यादौर्वो वाडवो वडवानलः॥१३॥
ज्वालो द्द्वयोस् तथा कीला हेतिरर्चिश् शिखा स्त्रियाम् ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जिह्व्वाऽपि तास्सप्त कालीकराल्ल्याद्द्याश्श्रुतौ श्रुता:॥१४॥
उल्का स्यान् निर्गतज्ज्वाला झलका महती शिखा ।
त्रिषु स्स्फुलिङ्गोऽग्निकणस् सन्तापस् सञ्ज्वरस् समौ ॥१५॥
स्त्र्युल्कुष्ष्युल्काऽप्प्यवक्क्षाणङ् क्रमकोऽलातमुल्मुकम् ।
दीप्तेऽग्निखण्डेऽङ्गारस् स्याच् शान्त इङ्गालकोकिलौ ॥१६॥
भसितम् भस्म भूतिस् स्त्री रक्क्षाऽऽस५ क्षारमस्त्रियाम् ।
वयो धूमो मेघवाही धूपोऽयङ् गन्धवासित: ॥१७॥
अग्निपत्नी तु स्स्वाहा स्स्यादग्नायी हुतभुक्प्रिया ।
इद्ध्मस् तनूनपाद् वाऽथ नराशंस इडस् तत: ॥१८॥
बर्हिर् द्वार उषानक्ते दैव्व्यहोतृयुगन् तथा ।
तिस्स्रो देव्व्यस् तथा त्वष्टा वनस्पतिरत५ परा: ॥१९॥
स्वाहाकृतय इत्त्येता आप्प्रीसूक्तेषु देवता:।
अश्श्वश् च शकुनिर् मण्डूका अक्क्षा ग्रावकास् तथा ॥२०॥
नाराशंसो रथश् चाऽपि दुन्दुभिश् चेषुधिस् तत:।
हस्तग्घ्नोऽभीशवश् चापि धनुर् ज्येषुरत५ परा ॥२१॥
अश्श्वाजन्न्युलूखलञ् च वृषभो द्रुघण५ पितु:।
नद्द्य आपश्चौषधयो यास्केन हि श्श्रुतर्षिणा ॥२२॥
स्तुतिभाक्त्वादिमे देवा युक्त्या संसादद्ध्य कीर्त्तिता:।
रात्त्रिश् चाऽरण्ण्यपत्नी च श्रद्धा च पृथिवी तथा ॥२३॥
अप्प्वेडा कीर्त्तिता देव्व्य५ पृथ्वीस्स्थाना हि वैदिकै:।
उलूखलं समुसलं हविर्धाने च रोदसी ॥२४॥
विपाट्छुतुद्द्द्यावार्त्त्यौ च शुनासीरौ तत५ परे ।
देव्व्यौ जोष्ट्र्यौ तथा देव्व्यावूर्जाह्व्वान्न्याविति क्क्रमात् ॥२५॥
युग्मान्न्यष्टौ वेदमन्त्रस्स्तुतिभाञ्जि श्श्रुतानि हि ।
देवपत्न्य इडा पृथ्वी अग्नायी चेति कीर्त्तिता: ॥२६॥

इत्त्याचार्यकौण्डिन्न्यायनकृते वेदभाषानिघण्टौ
भूलोककाण्डे देववर्गस् समाप्त:॥१॥

अथ ब्रह्म्मवर्ग:

श्रुतर्षयोऽपि स्स्युर् वंशकारत्त्वेन प्प्रकीर्त्तिता:।
अगस्त्याष्टमसप्तर्षिप्प्रजा गोत्त्राण्ण्यथापि वा ॥१॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भृगोरङ्गिरसो विश्श्वामित्त्रवसिष्ठयोस् तथा ।
कश्श्यपात्त्र्योरगस्त्यस्स्य प्प्रजा गोत्त्राणि तद्विधाः ॥२॥
कुलाक्ख्या गोत्त्रावयवा लोके गोत्त्रतया श्श्रुताः।
गोत्त्रर्षिस् तत्पूर्वजोऽपि ऋषिर् गोत्त्रविशेषकः॥३॥
अग्नेः प्रवरणश् चार्षमार्षेयम् प्रवरोऽपि च ।
स्यात् साक्क्षात्कृतधर्मा मन्त्रदृक् सत्त्यवचा ऋषिः॥४॥

जातमात्त्रा ऋषन्तो ये ब्रह्म्म ब्रह्म्मर्षयो हि ते ।
तथ ऋषन्ति ये देवाँस् ते हि देवर्षयो मताः ॥५॥
जातमात्त्रा महद् ब्रह्म्म ऋषन्तस् स्युर् महर्षयः।
तथैव च परम् ब्रह्म्म ऋषन्तः परमर्षयः॥६॥
ते धातारश् चेश्श्वराश् च तत्पुत्त्रा ऋषयो मताः।
ऋषिकास् स्युर् ऋषेः पुत्त्रा ऋषीकस्स्य श्श्रुतर्षयः॥७॥
ऋषिपत्नी ऋषी स्त्रीत्त्वेऽनसूयाऽत्त्रिप्प्रिया यथा ।

भृगवश् शुनका यस्का वत्साश् च जमदग्नयः॥८॥
विदा अङ्गिरसो दीर्घतमसो गोतमा अपि ।
वामदेवा जैमिनय उतत्थ्याश् च शरद्वताः ॥९॥
भरद्द्वाजा विष्णुवृद्धा गर्गाः कण्वाश् च मुद्गलाः।
विश्श्वामित्त्राश् च कुशिकास् तथैव घृतकौशिकाः ॥१०॥
आश्मरथ्याः पाणिनयः कताश् चैव धनञ्जयाः।
वसिष्ठाः कुण्डिनाश् चोपमन्न्यवश् च पराशराः ॥११॥
कश्श्यपाश् शण्डिला रेभा अत्त्रयश् च गविष्ठिराः।
अगस्त्तयश् चैवमाद्द्या भार्गवादिसगोत्त्रकाः ॥१२॥
विप्प्रा द्व्यामुष्यायणास् स्युर् द्विगोत्त्रा दत्तकादयः।
लौगाक्षयस् सङ्कृतयश् शौङ्गशैशिरयश् च दिक्॥१३॥

विश्श्वामित्त्रो जमदग्निर् भरद्द्वाजश् च गौतमः।
वसिष्ठःकश्श्यपोऽत्त्रिश् च सप्तर्षय इमेऽधुना॥१४॥

वसिष्ठ आपवः प्राणोऽक्क्षमाला स्यादरुन्धती ।
पराशरस् स्याद् यज्ञ्ञाड्ढ्यो वेदव्व्यासस् तु माठरः ॥१५॥
व्यासो द्वैपायनः पाराशर्यस् सत्त्यवतीसुतः।
कृष्णद्द्वैपायनः कानीनमुनिर् बादरायणः ॥१६॥
मत्स्यगन्धा सत्त्यवती शालङ्कायनजा तथा ।
दाशेयी वासवी योजनगन्धा गन्धकालिका ॥१७॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अथ वैयासकिर् बादरायणिश् च शुको मुनिः।
विश्श्वामित्त्रᳵ कौशिकश् च गाधेयो गाधिजोऽपि च॥१८॥
अगस्त्यᳵ कुम्भजो मान्न्योऽगस्तिरप्प्यौर्वशेयकः।
मैत्त्रावरुणिराग्नेयो लोपामुद्द्रा तु तत्प्रिया ॥१९॥

गौतमस् स्यादाङ्गिरसोऽहल्ल्या तत्सहधर्मिणी ।
यायावरो जरत्कारुर् दुर्वासास् तु कुशारणिः ॥२०॥
प्राचेतसस् तु वाल्मीकिस् स्यान् मैत्त्रावरुणिᳵ कविः।
वाल्मीकोऽपि स मैत्त्रावरुणोऽप्प्यादिकविᳵ कुशी ॥२१॥
याज्ञवल्क्यो मतो वाजसनेयो ब्रह्म्मरातजः।
कात्त्यᳵ कात्त्यायनᳶ पारस्करᳵ कात्त्यायनीसुतः॥२२॥

उपवर्षो हलभूतिᳵ कृतकोटिरयाचितः।
विन्ध्यवासी च मेधावी व्याडिस् स्यान् नन्दिनीसुतः॥२३॥
शालातुरीयो दाक्क्षेयᳵ कविᳶ पाणिनिराहिकः ॥
कात्त्यायनो वररुचिर् मेधजिच् च पुनर्वसुः ॥२४॥
पतञ्जलिर् भाष्यकारो गोनर्दीयश् च चूर्णिकृत् ॥
यास्को निरुक्तकारस् स्याच् छन्दस्सूत्त्री तु पिङ्गलः॥२५॥
लगधᳵ कालवित् प्रोक्तᳶ पालकाप्प्यᳵ करेणुभूः॥
वात्स्यायनो मल्लनागᳵ कौटल्ल्यो विष्णुगुप्तकः॥२६॥
चाणक्क्यᳶ पक्क्षिलस्स्वामी कौण्डिन्न्यश् च वराणकः।

कुलङ् गोत्त्रमनूकञ् च जननञ् च जनोऽन्न्वयः ॥२७॥
वंशोऽन्न्ववायस् सन्तानोऽभिजनᳶ प्रजनोऽपि च ।
पूर्वा वंश्यावलिर् वंश्यपारम्पर्यम् प्रशस्तिका ॥२८॥
कुल्ल्यᳵ कुलीनस् स्यान् माहाकुलीनश् च महाकुलः।
महाकुलीनो बीज्ज्यश् च कौलस् सद्गोत्त्रपुत्त्रकः॥२९॥

स्याच् श्रोत्त्रियकुलीनश् चाऽऽड्ढ्यकुलीनश् च दिक् तथा ।
स्यादामुष्यायणोऽमुष्यपुत्त्रᳶ प्रख्यातवप्तृकः ॥३०॥
दौष्कुलेयो दुष्कुलीनᳵ कौलकेयो निहीनजः ।

द्विजास् त्रैवर्णिका आर्या वर्णास् तु ब्राह्म्मणादयः॥३१॥
ब्रह्म्मक्षत्त्रियविट्शूद्द्राश् चातुर्वर्ण्यमिति स्मृतम् ।
विप्प्रब्रह्म्मब्राह्म्मणाऽग्ग्रजन्मभूदेववाडवाः॥३२॥
द्विजो द्विजाग्ग्र्यो मुखजो द्विजातिर् वेदगर्भकः ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

त्रिशुक्रियस् त्रिशुक्रश् च त्रिपवित्रस् त्रयीमुखः ॥३३॥
षट्कर्मा मैत्त्रसावित्त्रशमीगर्भत्त्रयीपुषाः ।
आदाय्यापाय्यावसायी यथाकामप्प्रयाप्यकः ॥३४॥
हुतादोऽभिगरो वर्णज्ज्येष्ठश् च कठ एतशाः ।
देवब्ब्राह्म्मणमुक्ख्याश् च तद्भेदा वृत्तभेदजाः ॥३५॥
योनिविद्यातपश्शुद्धे त्रिशुक्लस् त्रिककुप् समौ ।
स स्स्याद् दुर्ब्राह्म्मणो यस्स्याऽनग्नी पितृपितामहौ ॥३६॥
ऐषावीरो ब्रह्म्मबन्धुर् दुर्ब्रह्म्मा ब्राह्म्मणायनः।
ब्राह्म्मणब्ब्रुवो ब्राह्म्मणो ब्रुवाणो जातिब्राह्म्मणः॥३७॥
पञ्चालब्रह्म्मो नेपालब्रह्म्मो जानपदेषु दिक् ।
यजनयँ याजनञ् चाऽद्ध्ययनमद्ध्यापनन् तथा ॥३८॥
दानम् प्रतिग्ग्रहश् चेति षट्कर्माण्ण्यग्ग्रजन्मनाम् ।
विद्वान् विपश्चिद् दोषज्ज्ञस् सन् सुधीᳲ कोविदो बुधः ॥३९॥
प्रज्ज्ञᳲ प्राज्ज्ञो मनीषी ज्ञस् सङ्ख्यावान् पण्डितो विदन् ।
धीमान् सूरिᳲ कृती कृष्टिर् लब्धवर्णो विचक्क्षणः॥४०॥
विप्प्रो विग्ग्रो गृत्सधीरवेना वेधाᳲ क्रतुᳲ कविः।
कण्ण्वो नवेदा मन्धाता विधाता च सवृद् विपः ॥४१॥
अनुशिष्टो मनश्चिच् च विपण्ण्युर् मतुथो मतिः।
चिकित्त्वाँश् चेकितानश् चाऽऽकेनिपᳲ केनिपो मनुः ॥४२॥
मेधाविनोऽद्धातयश् चोशिजᳲ कीस्ताश् च वाघतः।
प्रचेताᳲ प्रमृशᳲ पाक्क्यो विचेता विद् विदुष्टरः॥४३॥
विदुर् वेधस्तमो वैद्यो जातवेदा धियावसुः।
सुचेतुर् मेधिरो वीर एहिमायश् शचीवसुः ॥४४॥
प्रजज्ज्ञिस् सुक्क्रतुस् स्वर्विद् मायी ज्ञानी च शिक्क्षितः।
विदानᳲ पूर्वचित्तिश् च शचीवाँस् तत्त्वदृक् तथा॥४५॥
जागृवान् जागृविर् जागरूकस् स्याच् च विचर्षणिः।
बुद्धᳲ प्रबुद्ध उद्बुद्धोऽभियुक्तस् त्वभियोगभाक् ॥४६॥
विद्वन्मन्न्यस् सुधिम्मन्न्यᳲ पण्डितम्मन्न्य इत्त्यपि ।
दूरदर्शी दीर्घदर्शी दूरेदृक् क्रान्तदर्शिनि ॥४७॥
सूरचक्क्षाᳲ कुशाग्ग्रीयबुद्धिस् स्यान् निपुणोऽणुकः।
ऋषीणान्निधिगोपश् छान्दसश्श्रोत्त्रियवैदिकाः ॥४८॥
मन्त्रवित् पाठकस् सम्पाठपाठᳲ कलपाठकः॥
ऋग्मि ऋक्क्वा बह्व्वृचस् स्याद् याजुष्काद्ध्वर्युयाजुषाः॥४९॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सामवेदी सामकश् च गेयच्छन्दोगसामगाः ।
आथर्वाङ्गिरसोऽथर्वा स्यादाथर्वणिकोऽपि सः॥५०॥
आथर्वणो ब्रह्मवेदी स्यात् पौरोहितवेद्द्यपि ।
चातुर्वेद्यश् चतुर्वेदस् त्रैविद्यस् तु त्रिवेदकः॥५१॥
शाङ्खायनीयास् तथाऽऽश्वलायनीयाश् च शाकलाः।
तैत्तिरीयाश् च चरकाः कपिष्ठलकठाः कठाः॥५२॥
मैत्रायणीयाः कालापा मानवाश् छागलेयिनः।
माद्ध्यन्दिनीया जाबालाः काण्वा वाजसनेयिनः॥५३॥
अथ राणायनीयाश् च जैमिनीयाश् च कौथुमाः।
अथर्वाणश् शौनकिनः पैप्पलादा द्द्वयेऽधुना॥५४॥
स्युः कौषीतकिनश् चैतरेयिणश् चाऽथ ताण्डिनः।
तथैव शाट्ट्यायनिनस् स्युष् षष्टिपथिकादयः॥५५॥
अग्निष्टोममधीते यस् स आग्निष्टोमिकस् तथा ।
स्यादाश्वमेधिको राजसूयिको वाजपेयिकः ॥५६॥
सांहितिकोऽथ पदकः पदिकः क्रमकोऽपि च ॥
समाप्तिगश् च शाखान्तगोऽपि स्याद् वेदपारगः॥५७॥
शाखापारस् तथा पदपारश् च क्रमपारकः।
चर्चा पाठे चर्चकस् तु शिष्यस् स्याच् श्रावको गुरुः॥५८॥
अथ श्रवणीयपारस् सौववेदसमापनम् ।
शाखारण्डः पठेद् यस्स्वां शाखान्त्यक्त्वा परस्य ताम्॥५९॥
गन्धर्व औपनिषदो वेदान्त्याद्ध्यात्मविद्यिकः।
स्युर् ब्रह्मोद्यब्ब्रह्मवाद्यब्ब्रह्मिष्ठा ब्रह्मवादिनः ॥६०॥
षडङ्गवित् त्वङ्गजित् स्याच् शिक्षाद्ध्यायी तु शिक्षकः।
अहर्वित् काल्पसूत्रश् च याज्ञिको याज्ञविद्यिकः ॥६१॥
धर्ममीमांसकस् तर्की चोपजिज्ञास्यचिन्तकः ।
नैयायिको विकल्पी च वाक्यतात्पर्यशास्त्रवित्॥६२॥
पदवाक्यव्याकृतिज्ञे वैयाकरण-शाब्दिकौ ॥
शाब्दोऽथ वैयाकरणखसूचिर् मन्दशाब्दिके ॥६३॥
मीमांसकदुर्दुरूटस् तर्कैकरुचितर्किणि ।
नैरुक्तिकश् च नैरुक्तो दैवताविद्यिकोऽपि सः ॥६४॥
पौराणिकास् स्युराख्याना नैदाना ऐतिहासिकाः।
सांवत्सरो ज्यौतिषिकस् तथा नाक्षत्त्रविद्यिकः॥६५॥
मौहूर्तिकश् च मौहूर्तो गणकस् सङ्कलित्त्यपि ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्याद् धर्मसंहिताद्ध्यायी धार्मिको धर्ममाणवः॥६६॥
धर्मसूत्री धार्मविद्यस् स्मृतिज्ज्ञो द्रोणपाठकः।
पारायणवँ वर्तयति यः पारायणिको हि सः॥६७॥
परोवरीणस् स्यात् पारोवर्यवित् सम्प्रदायवित् ।
पारम्पर्योपदेशे स्यादैतिह्यमितिहाऽव्ययम् ॥६८॥
उपज्ज्ञा ज्ञानमाद्यं स्याज् ज्ञात्त्वाऽऽरम्भ उपक्क्रमः।
अहङ्कारक्क्रोधलोभमोहमात्सर्यवर्जिताः॥६९॥
अनूचानतमा धर्मशीलाश् शिष्टा इति स्स्मृताः॥
निषेकादीँश् च सँस्कारान् कृतवान् वेददो गुरुः॥७०॥
उपनेतोपदेष्टेष्ष्वो बुधानोऽद्ध्यापकस् तथा ।
दिशानो देशिकः क्षाणी शाक्तो ब्राह्मिकतैर्थिकौ ॥७१॥
वक्त्वः प्रवक्ताऽऽक्ख्याताऽद्ध्यायकः प्रवचनीयकः॥
परमाद्ध्यापकः काष्ठाद्ध्यापकाद्याश् च पूजने ॥७२॥
आचार्यस् साङ्गवेदस्य प्प्रवक्ता ग्रन्थतोऽर्थतः॥
गन्तव्व्यो योजनशताद् यौजनशतिकश् च सः॥७३॥
प्राचार्य आचार्याचार्यस् तथा प्राद्ध्यापकश् च दिक् ।
विप्प्रःकुलपतिश् छात्त्रान् भृत्त्वाऽद्ध्यापयिताऽयुतम् ॥७४॥
उपाद्ध्यायो वेदवेदाङ्गैकदेशस्स्य पाठकः।
स्यात् खण्डिकोपाद्ध्यायस् तु कण्डिकापाठको गुरुः ॥७५॥
समादिष्टक आचार्यादिष्टोऽद्ध्यापयिता बुधः।
विद्यागुरुर् दीक्षयितुर् भिन्नो विद्याप्रदो गुरुः ॥७६॥
भृतकाद्ध्यापकश् चाऽनुयोक्ता च भृतिपाठकः।
अनुयुक्तश् च भृतकाद्ध्यापितस् तेन पाठितः ॥७७॥
दारकाचार्य-सङ्ख्यानि-प्रावाच्च्य-लिपिशिक्षकाः।
स्यान् मौञ्जीबन्धनमुपनयनवँ व्रतबन्धनम् ॥७८॥
कल्पो विधिः क्रमस् स्त्र्यावृत् पद्धतिश् चाऽयनन् तथा ।
मुक्ख्याऽऽवृत् प्रथमः कल्पोऽनुकल्पस् तूपकल्पकः ॥७९॥
पौर्वापर्यन् त्वानुपूर्व्यम् पर्यायोऽनुक्क्रमः क्रमः।
अनुपात्त्यय आवृत् स्त्री परिपाट्ट्यानुपूर्व्यपि ॥८०॥
पर्ययस् त्वतिपातस् स्यादपक्क्रम उपात्त्ययः।
बहिश्शालोपनयनादिके यज्ञियमण्डपः ॥८१॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भूसँस्काराः पञ्च परिसमूहनाद्याः पञ्च कीर्तिताः।
पांसूनामपसारस् स्याद् दर्भैः परिसमूहनम् ॥८२॥
उपलेपनमाहुस् त्रिर् गोमयोदकलेपनम् ।
उल्लेखनञ् चोद्धननम् प्रागग्रं स्फ्येन कर्षणम् ॥८३॥
पांस्वादाने तूद्धरणमङ्गुष्ठानामिकाकृते ।
अभ्युक्षणावोक्षणे तु जलेन परिषेचने ॥८४॥
अग्नेरुपसमाधानं स्थापनं ह्यात्मसम्मुखम् ।
ब्रह्माऽत्र गृह्यकृत्याद्यवेक्षणाय वृतो द्विजः॥८५॥
स्यात् प्रणीताप्प्रणयनमपाम्प्रणयनञ् च तत् ।
स्यात् परिस्तरणवँ वह्निम् परितस् स्तरणङ् कुशैः॥८६॥
आसादनीयास् ते येऽर्था उपकल्प्या हि कर्मसु ।
पवित्रे तु कुशैश् छिन्ने साग्रके कुशपत्रके ॥८७॥
प्रोक्षणीनामपाम् पात्रम् प्रोक्षणीपात्रमुच्यते ।
आज्यस्थालीचरुस्थाल्यौ स्थाल्यौ द्वे घृतभक्तयोः॥८८॥
महीमयी च माहेयी मार्तिकी मृत्तिकाभवा ।
स्रुवादिमार्जनार्था ये ते सम्मार्गकुशाः कुशाः ॥८९॥
कुशा उपग्रहाश् चोपयमना वामहस्तगाः।
समित् सवल्कम् प्रादेशमङ्गुलस्थूलमिन्धनम् ॥९०॥
स्रुव आघारणोऽरत्निः खादिरोऽङ्गुष्ठपर्वखः।
मुष्टयोऽष्टौ हि कुञ्चिस् स्यात् कुञ्चयोऽष्ट हि पुष्कलम् ॥९१॥
पुष्कलानि तु चत्वारि पूर्णपात्रो नपुंस्यपि ।
सपवित्रोत्तानहस्तकृते सेके हि प्रोक्षणम् ॥९२॥
पर्युक्षणम् प्रसलवि परितोऽग्निञ् जलोक्षणम् ।
स्थाल्याम् मिताज्यादिप्रक्षेपणन् निर्वपणं स्मृतम् ॥९३॥
स्यादधिश्रयणं स्थाल्या वासनम् पावकोपरि ।
पर्यग्निकरणन् दीप्तोल्मुकभ्रमणमुच्यते ॥९४॥
उत्तारणोद्वासनाऽधश्श्रयणान्यवतारणम् ।
उच्छालनन् तूत्पवनम् पवित्राभ्याम् पृथक्पृथक् ॥९५॥
साग्रे नव्ये स्याद् धि कुशतरुणङ् कुशपत्रके ।
गोदानं श्रवणोर्ध्वस्थे स्यान् मुण्ड्ये शीर्षभागके ॥९६॥
समुन्दनेऽभ्युन्दनं स्यात् तूस्तनन् तु वितारणम् ।
क्षौरन् तु भद्राकरणम् मद्राकरण-मौण्डिके ॥९७॥
वपनन् तिरषु पर्युप्तिर् मुण्डनम् परिवापणम् ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अथोदकाब्भ्यवायस् स्याज् जले स्नानाय बुड्डनम् ॥९८॥
वाचनं स्याद् ब्रह्म्मचर्यमागामित्त्यादिवाचनम् ।
वासोदानङ् गुरुकृतं स्याद् वासःपरिधापनम् ॥९९॥
यज्ञोपवीतयँ यज्ञार्थोत्तरीयेऽस्स्याऽनुकल्पके ।
यज्ञसूत्त्रम् पवित्त्रञ् च सूत्त्रं स्त्री तु द्विजायनी ॥१००॥
उपवीतम् ब्रह्म्मसूत्त्रम् प्रोद्धृते दक्षिणे करे ।
प्राचीनावीतमन्न्यस्मिन् निवीतङ् कण्ठलम्बितम् ॥१०१॥
वामं शरीरं सव्व्यं स्यादपसव्व्यन् तु दक्षिणम् ।
प्रदक्षिणम् प्रसलवि प्रासव्व्यन् दक्षिणानुगम् ॥१०२॥
प्रसव्व्यं स्यादपसलै ह्यव्व्ययोऽपसलव्व्यपि ।
चर्माऽजिनं शर्म शक्म गान्त्रङ् कृत्तिश् चमूश् छविः॥१०३॥
कृष्णाजिनन् तु सुकृतयोनिः प्रसितिरित्त्यपि ।
ऐणेयं रौरवम् बास्तङ् गव्व्यमानडुहञ् च दिक् ॥१०४॥
कटिसूत्त्रङ् कञ्चिकन् नीनाहो मौञ्जी च मेखला ।
रशना रसना रास्ना सप्तकी काञ्चिरित्त्यपि ॥१०५॥
सौत्त्री सा धटिनी रम्भा मौर्वी त्त्वेकलमात्त्रिका ।
लगुडो लकुटो दण्डो यष्टिस् स्त्री दमयन्तिका ॥१०६॥
रम्भः पिनाकञ् चाथो तद्भेदाः काष्ठादिभेदजाः।
पालाशो दण्ड आषाढो व्रते राम्भस् तु वैणवः॥१०७॥
बैल्ल्वस् सारस्स्वतो रौच्च्यः पैलवस्त्वौपरोधिकः॥
अजितनेमिराश्श्वत्थ औदुम्बर उलूखलः॥१०८॥
कमण्डलुः कुसुम्भोऽस्त्री करकः कुण्डिकाऽपि च ।
अञ्जलेः पूरणेऽवक्क्षारणमञ्जलिना कृते ॥१०९॥
परिदानन् तु भूतेब्भ्यो वाचा दानमरिष्टये ।
संशासनं स्याद् वटवे व्रतानामनुशासनम् ॥११०॥
उपसन्नः प्रपन्नस् स्यादुपदेशोऽनुवाचनम् ।
स्यादग्निकर्म समिदाधानं सन्धुक्षणादिकम् ॥१११॥
स्यान् मेधाजननम् मेधायाच्ञाऽग्न्यादेर् यथाविधि ।
अङ्गालम्भनमङ्गानां स्पर्शनम् मन्त्रपूर्वकम् ॥११२॥
निटलादौ भस्मरेखास् त्र्यायुषाणि त्त्रिपुण्ड्रकम् ।
निवेद्द्य मान्न्ये स्वन्चाऽऽशीर्वाचनं ह्यभिवादनम् ॥११३॥
मान्याशीः प्रत्याशीर्वादस् तथा प्रत्यभिवादनम् ।

Prof. Ambdavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

उपसङ्ग्रहणम् पादग्ग्रहणवँ विधिवद् गुरोः॥११४॥
नतिऽपद्भ्यान्न् च जानुब्भ्याम् पाणिब्भ्यामुरसा धिया ।
शिरसा वचसा दृष्ट्या साष्टाङ्गप्प्रणतिर् मता ॥११५॥
बाहुब्भ्यान्न् चैव जानुब्भ्यावँ वक्क्षसा शिरसा धिया ।
यऽ प्रणामस् स पञ्चाङ्गप्प्रणामो विदुषाम् मतः॥११६॥
नमस्कारस् साञ्जलिकं शिरसो नमनम् मतम् ।
शौचाचारश् शौचकल्पो मैत्त्रं शौचविधिश् च सः॥११७॥
आचारस् समुदाचारश् चरित्त्रन्न् चरणन् तथा ।
समाचारस् सदाचारश् चारित्त्रवँ वृत्तमित्त्यपि ॥११८॥
शौचं स्यान् मलमार्गादिर् जलाद्द्यैऽ परिमार्जनम् ।
उपस्स्पर्शस् त्वाचमनं शौचाद्द्यर्थमपोऽशनम् ॥११९॥
दैवन्न् चार्षन् तीर्थमग्ग्रे कायङ् कन्न्यसिकादिके ।
पित्त्र्यं स्यात् तर्जनीमूले ब्राह्म्ममङ्गुष्ठमूलके ॥१२०॥
मद्ध्य आग्नेयन्न् च सौम्म्यवँ विप्प्राणान् दक्क्षिणे करे ।
स्नानमाप्प्लव आप्प्लावो मज्जनन्न् चावगाहनम् ॥१२१॥
सवनन्न् चाऽभिषेकश् चोपस्स्पर्शनमथो भिदाः।
नित्त्यन् नैमित्तिकङ् काम्म्यङ् क्रियाङ्गम् मलकर्षणम् ॥१२२॥
क्रियास्नानन्न् चाऽथ मन्त्रस्स्नानाद्द्या ह्य्यनुकल्पकाः।
मार्जनम् पावनन् दर्भैस् समन्त्रैऽ परिकीर्त्तितम् ॥१२३॥
सर्वैनसामपद्ध्वंसि जप्प्यन् त्रिष्ष्वघमर्षणम् ।
प्राणायामऽ पूरकादिप्प्रयोगस् स्याद् यथाविधि ॥१२४॥
सन्ध्यासु सूर्यायोत्क्षेपोऽपां सन्ध्योपासनम् मतम् ।
गायत्त्र्यादिजपस् त्वत्त्र पवित्त्रजपयज्ज्ञकः॥१२५॥
वेदव्व्रतवँ वेदब्रह्म्मचर्यवँ वेदार्थकवँ व्रतम्
तच् च सावित्त्रमाग्नेयं शौलभन्न् च शिरोव्रतम् ।१२६॥
शुक्क्रियन्न् चौपनिषदमादित्त्यं शाक्क्वरन्न् च दिक् ।
महानाम्न्यो व्रतम् माहानाम्निकवँ व्रतमित्त्यपि ॥१२७॥
स्युर् माहानाम्निकाद्द्याश् च तत्तद्व्रतधरा नराः।
ब्रह्म्मचारिव्व्रतमधश्शयनादिकयन्त्रिये ॥१२८॥
भिक्क्षाचर्यम् भिक्क्षणं स्याद् भैक्क्षम् भिक्क्षाकदम्बकम् ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वाचयँयमो वाग्यतश् च मौन्न्यथो वाग्विसर्जनम् ॥१२९॥
वरिवस्स्या तु शुश्श्रूषा परिचर्याऽप्प्युपासना ।
भक्तिस्सेवाऽऽराधनञ्च निह्न्नवश्च प्प्रसादनम् ॥१३०॥
पूजा नमस्स्याऽपचितिस् सपर्या चाऽर्हणा विधा ।
दुवो दुवस्स्येरज्ज्याऽऽर्ह्नती सपन-विवासने ॥१३१॥
अब्भ्युत्थानन् तु सम्माने तथा प्रत्त्यवरोहणम् ।
निराकृतिश् चाऽननूक्तिस् स्वाद्ध्यायरहितो द्विजः॥१३२॥
व्रात्त्यस् सँस्कारहीनो व्रा अवकीर्णी क्षतव्व्रतः॥
सुप्ते यस्मिन्नस्तमेति सुप्ते यस्मिन्नुदेति च ॥१३३॥
अंशुमानभिनिम्म्रुक्तोऽब्भ्युदितश् च यथाक्रमम् ।
ब्रह्म्मचारी व्रती वर्णी शिक्ख्यादिष्टी गुरौ वसन् ॥१३४॥
अष्टाचत्त्वारिंशकोऽष्टाचत्त्वारिंशी समार्थकौ ।
त्रिरात्रव्व्रति-गायत्त्रौ द्वौ वेदव्व्रति-ब्राह्म्मकौ ॥१३५॥
प्राजापत्त्यो ब्रह्म्मचारी दारान् गच्छेदृतौ हि यः।
उपाकुर्वाणस् तु वर्णी वेदस्स्य ग्ग्रहणे रतः॥१३६॥
आप्प्रायणाद् ब्रह्म्मचार्यूर्ध्वरेता नैष्ठिको बृहन् ।
उपेयिवानुपेतस् स्यादूषिवानुपसेदिवान् ॥१३७॥
केशान्ते गोदानविधिस् स्यात् केशश्श्मश्श्रुकर्म च ।
मौञ्जीमोक्क्षो व्व्रतविसर्गस् समावर्तनञ् च तत् ॥१३८॥
स्याद् दन्तमार्जनन् दन्तपवनङ् काष्ठकूर्चतः।
स्याद् दन्तधावनञ् चाऽपि दन्तधावनभक्क्षणम् ॥१३९॥
जिह्व्वानिर्लेखनमथो गण्डूषो मुखशुन्धनम् ।
गन्धस्स्य मात्त्रया सेवा ह्व्यङ्गरागोऽनुलेपनम् ॥१४०॥
स्याद् वस्त्रपरिधानं हि शुद्धयोर् वाससोर् धृतिः।
माल्ल्यस्स्य तु प्प्रयोगस् स्रग्ग्रहणम् माल्ल्यधारणम्॥१४१॥
उष्णीषवँ विष्टनङ् खोलस् स्तूपिका च शिरस्त्रकम् ।
स्यात् कर्णवेष्टकः पुंसि कुण्डलङ् कर्णवेष्टनम् ॥१४२॥
अञ्जनन् दृग्वर्त्त्मलेपो मेचकलँ लोचकञ्च च तत् ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

कांस्यकाचादिजो रश्मिपरावर्तकपट्टकः॥१४३॥
आदर्श आत्मदर्शश् च दर्पणो मुकुरोऽपि च ।
छत्त्रन् त्रिलिङ्ग्यां स्यादातपत्त्रमातपवारणम् ॥१४४॥
उपानत् पादुका पादूः पादत्त्रम् पादरक्क्षणम् ।
पन्नद्ध्री पुटबद्धा साऽनुपदीना पदायता ॥१४५॥
स्नातकस् स्यात् समावृत्तो गुर्वनुज्ज्ञाप्प्लुतो व्रती ।
स्याद् विद्द्यास्नातकश् चाऽथ व्रतस्स्नातक इत्त्यपि ॥१४६॥
विद्द्याव्रतस्स्नातकश् च स्युस् स्नातकभिदा इमाः।
अथ स्स्नातयमा नृत्त्यगीतादिवर्ज्जनादिकाः॥१४७॥
अनूचानस् समृद्धश् च साङ्गवेदी युगी गणिः।
बहुश्श्रुतश् शुश्श्रुवाँश् च वेदलोकविचक्क्षणः॥१४८॥
आश्श्रमोऽस्त्री ब्रह्म्मचारिवासादिषु चतुर्ष्वपि ।
चत्त्वार आश्श्रमाश् चातुराश्श्रम्म्यमिति च स्स्मृताः॥१४९॥
ब्रह्म्मचर्याश्श्रमगुरुकुलवासौ तथाऽजिनम् ।
आजानिकमृणमृषि-देव-पितृ-मनुष्ष्यजम् ॥१५०॥
ऋणन् तस्स्याऽनपाकर्ता योऽनद्धापुरुषो हि सः।
विवाहस् स्यात् परिणय उद्वाहो दारसङ्ग्रहः॥१५१॥
पाणिग्ग्रहश् चोपयमोपयामौ पाणिपीडनम् ।
दाराधिगमनं हस्तेकरणञ् च निवेशनम् ॥१५२॥
पाणौकरण-वाधुक्क्ये स्त्रियाञ् जम्बूलमालिका ।
स स्स्याद् धर्मविवाहो योऽविच्छेद्द्यो धर्मणे कृतः॥१५३॥
ब्राह्म्मम् प्राजापत्त्यमार्षन् दैवङ् गान्धर्वमासुरम् ।
स्याद् राक्क्षसञ् च पैशाचञ् जायावेदनमष्टधा ॥१५४॥
वाङ्निश्चयस् स्याद् वाग्दानञ् जन्न्यास् स्निग्धा वरस्स्य ये ।
विवाहयात्त्रा सत्त्रा स्याद् वरयात्त्रा च सा मता ॥१५५॥
कन्न्यागेहे विवाहस् स्यादावाहो वरमन्दिरे ।
वहतुस् स्याज् जन्न्यततिरुलूलुर् मङ्गलद्ध्वनिः॥१५६॥
सर्वौषधीकृष्णतिलगन्धामलकचूर्णकैः।
उद्वर्त्य मङ्गले स्नानम् मङ्गलस्स्नानमुच्च्यते ॥१५७॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सर्वौषद्ध्यो हरिद्द्रे द्द्वे जटामांसी मुरा वचा ।
चन्दनञ् चम्पकम् मुस्तङ् कुष्ठं शैलेयकन् दश ॥१५८॥
मधुपर्को दधिमधुघृतङ् कांस्ये सुसम्भृतम् ।
पादार्थविष्टरश् पद्यमर्घ आपो हि पूजने ॥१५९॥
द्रवक्षेपे निनयनं स्यात् प्रयावस् तु फाणनम् ।
निरुक्षणञ् छर्दनं स्यात् प्राशनम् पानभोजनम् ॥१६०॥
वधूसन्नहनवँ वद्ध्वाश कट्ट्यां सूत्त्रेण बन्धनम् ।
समञ्जनङ् गन्धतैलादिभिस् सँस्करणम् मतम् ॥१६१॥
कलाच्च्यां स्यात् प्रतिसरबन्धश कङ्कणबन्धनम् ।
कन्न्यादानन् तु कन्न्याया वराय प्प्रतिपादनम् ॥१६२॥
लाजहोमश् शमीपत्त्रमिश्श्रलाजाहुतौ स्मृतः।
शूर्पकुष्ठा शूर्पकोणस् तेजनी तृणपूलकः॥१६३॥
वद्ध्वास् साङ्गुष्ठहस्तस्स्य ग्ग्रहश पाणिग्ग्रहो मतः।
स्थैर्यायाऽऽरोहणवँ वद्ध्वा अश्मारोहणमश्मनि ॥१६४॥
परिक्क्रमश परिणयश परितोऽग्निञ् जनेर् नयः।
प्रक्कामणं सप्तपदी वद्ध्वास् सप्त पदानि हि ॥१६५॥
ध्रौव्व्याय दर्शनवँ वद्ध्वा ध्रुवस्स्य द्ध्रुवदर्शनम् ।
जनित्त्रयात्त्रा सजनेर् वरस्स्य स्स्वगृहागमः ॥१६६॥
चतुर्थीकर्म तत् तन्न्वोर् द्वयोरैक्क्याय कर्म यत् ।
विवाहितो वित्तजानिर् ग्नावानौदुम्बरायणः॥१६७॥
प्राजापत्त्यश् चाऽथ ज्येष्ठेऽनूढवत्त्यूढवान् परः।
परिवेत्ता परिविविदानश् च परिविन्दकः॥१६८॥
परिवित्तिस् त्वपि परिवित्तश् च परिविन्नकः।
स्याज् ज्येष्ठायामनूढायाङ् कन्न्योढा परिवेदिनी ॥१६९॥
अग्ग्रेदधुश् चाऽग्ग्रदिधिषूरग्ग्रेदिधिषूश् च सा ।
तत्पतिस् स्यादेदिधिषूश्पतिस् स्याद् दिधिषूस् त्वसौ ॥१७०॥
परिदायी स्याच् च परिदाताऽग्ग्रेदिधिषूपिता ।
गृहमेधस् तु गार्हस्थ्यं स्याद् गृहस्थाश्श्रमो मलम् ॥१७१॥
गृहस्थोऽब्भ्यागारिकश् च गृह्य्यो ज्येष्ठाश्श्रमी गृही ।
गृहमेधी गृहपतिर् निविष्टश् चाऽपि पस्त्यसत् ॥१७२॥
वार्तावृत्तिश् च शालीनस् तथा यायावरोऽपि च ।
घोराचारिक इत्येता [illegible] स्मृताः ॥१७३॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

आत्मयाजी कर्मयोगी वेदसन्न्यासिको गृही ॥
शालाकर्म गृहोत्थानवास्तुशान्त्यादिके मतम् ॥१७४॥
जलधान्न्यास् तु मणिकावधानं स्थापनङ् गृहे ।
स्मार्त्ताधानं स्वसँस्कारस्स्मार्तकर्माग्निसाधनम् ॥१७५॥
आधानमावसत्थ्यादेरपूर्वं स्थापनङ् खरे ।
करीषपिण्डारूढाग्नेर् नित्त्यं रक्क्षा हि धारणम् ॥१७६॥
उपस्थानम् प्रणामादौ समन्त्रेऽमन्त्रकेऽपि वा ।
निमित्तात् पुनराधानम् पुनराधेयमुच्च्यते ॥१७७॥
गृह्य्यस्स्मार्तौपासनावसत्थ्यशालाग्नयस् तथा ।
पाकौपसदवैवाहिकाग्नयश् च समार्थका:॥१७८॥
स्यादौपासनहोमोऽत्त्र यत् सायम्प्रातराहुति:।
अथ स्स्यात् पार्वणस्स्थालीपाकः पक्क्षादिकर्म च ॥१७९॥
हविर् हव्व्यं होम्म्यद्रव्व्ये हविष्ष्यं हविषे हितम् ।
हविर्भेदा आज्ज्यचरुपुरोडाशादयश् श्रुता:॥१८०॥
चरुस्स्थालीपाकहव्व्यपाकदेवौदनास् समा:।
यस्स्यौपासन एवाग्निरेकाग्निः काल्पिकश् च स:॥१८१॥
जातमात्त्रगग्राहिताग्निर् यस् स जातारणिर् द्विज:।
दर्शश्श्राद्धम् मासिश्श्राद्धम् पार्वणश्श्राद्धमित्त्यपि ॥१८२॥
अन्न्वाहार्यम् मासिकञ् च पिण्डान्न्वाहार्यकञ् च तत् ।
स्यात् प्रातराह्न्निकम्प्रातःकृत्त्यञ्च प्प्राह्ण्णकर्मणि॥१८३॥
माद्ध्याह्न्निकञ्चाह्न्निकञ्च स्यान्माद्ध्यन्दिनकर्म च ।
वैश्श्वदेवङ् कर्म पञ्चमहायज्ज्ञाः प्रकीर्तिता:॥१८४॥
ब्रह्म्मयज्ज्ञो ब्रह्म्मसत्त्रं स्वाद्ध्यायाद्ध्ययनञ् जप:।
अनिराकरणवँ वेदमधीत्त्याधीत्त्य मन्त्रणम् ॥१८५॥
जलाद्द्यैर् ब्रह्म्मदेवादिप्प्रीणनन् तर्पणम् मतम् ।
देवपूजा तु ब्रह्म्मादिदेवानामृक्कृता स्तुति:॥१८६॥
ब्रह्म्मोज्झोऽधीतविस्स्मर्ता ब्रह्म्मयज्ज्ञस्स्य वर्जनात् ।
देवयज्ज्ञो वैश्श्वदेवान्नाद् ब्रह्म्मादिभ्भ्य आहुति:॥१८७॥
भूतयज्ज्ञो भूतगृह्य्यदेवेभ्भ्यो विधिना बलि:।
पितृयज्ज्ञस् तु पितृभ्भ्यो वैश्श्वदेवान्नकार्पणम् ॥१८८॥
मनुष्ष्ययज्ज्ञस् स्याद् विप्प्रभिक्क्षुकातिथिपूजनम् ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

भिक्क्षा तु ग्रासे स्याद् भिक्क्षापुष्कलस् तच्चतुष्टयम् ॥१८९॥
ते चत्त्वारो हन्तकारो हन्तकारद्द्वयङ् घनः ।
अतिथिर् नाऽऽवेशिकस् स्यादागन्तुश् च गृहागते ॥१९०॥
सूर्योढस् तु स सम्प्राप्तो यस् सूर्येऽस्तङ् गतेऽतिथिः।
प्राघुणः प्राघूर्णकश् च प्प्राहुणोऽब्भ्यागतोऽपि च ॥१९१॥
आतिथेयोऽतिथौ साधुरातित्थ्यं स्यात् तदर्थकम् ।
प्रणाय्यश् च प्प्रणोद्द्यश् चाऽपनोद्द्योऽसम्मते जने ॥१९२॥
अर्घ्यन् त्रिषु स्स्यादर्घार्थे पाद्द्यम् पादाय वस्तुनि ।
अन्नम् पञ्चमहासत्त्रावशिष्टवँ विघसस् स्मृतः॥१९३॥
अथ भोजनकल्पश् च स्याद् भोजनविधिश् च सः।
प्राणाग्निहोत्त्रं स्यात् पञ्चग्ग्रासीग्रासे यथाविधि ॥१९४॥
अभक्क्ष्यन् तद् धि शास्त्रेण निषिद्धयँ यस्स्य भक्क्षणम् ।
वेदारम्भ उपाकर्म वेदाऽद्ध्यापनप्रक्क्रमः॥१९५॥
अद्ध्यापनम् प्रवचनयँ यथाविद्ध्युपयोजनम् ।
गुरुवक्त्रोच्चारणानूच्चारणेऽद्ध्ययनं श्रुतेः॥१९६॥
उच्चारणेऽनुद्द्रवणम् पठनोच्चरणे अपि ।
संस्कारपूर्वङ् ग्रहणं स्यादुपाकरणं श्रुतेः ॥१९७॥
संस्था जिघृक्क्षयाऽऽवृत्तिर् गृहीताब्भ्यसने पुनः।
घोषणं स्याद् गुणनिका चर्चा तु गुणनान्तरे ॥१९८॥
गुणनादौ सतीर्थ्येस् स्यात् पट्टिका पट्टमन्न्यकैः ॥
स्याद् ब्रह्म्मवर्चसवँ वृत्ताद्ध्ययनर्धिरथाञ्जलिः॥१९९॥
पाठे ब्रह्म्माञ्जलिः पाठे विप्प्रुषो ब्रह्म्मबिन्दवः।
एकब्ब्रह्म्मव्व्रताचारा मिथस् सब्ब्रह्म्मचारिणः॥२००॥
धर्मब्भ्राता सहाद्ध्यायी सतीर्थ्यैकगुरू अपि ।
शिष्य्यस्तु च्छात्त्रोऽन्तेवासी शैक्क्षाः प्राथमकल्पिकाः॥२०१॥
ऐकान्त्यिकोऽपपाठस् स्याद् यस्स्यैको हि परीक्क्षणे ।
एवन् द्वैयन्त्यिकाद्द्यास् स्युस् तथा त्रयोदशान्त्यिकः॥२०२॥
तीर्थद्ध्वाङ्क्षस् तीर्थकाकः खट्ट्वारूढस् तु जाल्मकः।
शिष्य्यशिष्य्यः प्रशिष्य्यस् स्यात् प्रान्तेवासी च दिक् तथा ॥२०३॥
पैलो वैशम्पायनश् च जैमिनिश् च सुमन्तुकः।
तथा कौषीतको माद्ध्यन्दिनिः कुथुमि-शौनकौ ॥२०४॥
काश्यपीयाः पाणिनीयाः काण्वास् स्युः कौण्डिना अपि ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जैह्वाकाता अथौदनपाणिनीयाश् च दिङ् मताः ॥२०५॥
तेऽनद्ध्याया यत्र न हि ग्ग्रहणङ् गुणनं श्रुतेः।
उत्सर्जनं स्यात् स्वाद्ध्यायाद्ध्यापनान्तो यथाविधि ॥२०६॥
अनूचो माणवस् स्नास्यन् शब्देनेद् दण्डमाणवः।
श्रावणी श्रवणाकर्म सायंसर्पबलौद्वयम् ॥२०७॥
पृषदाज्ज्यं सदद्ध्याज्ज्ये पृषतश् च पृषातकः।
पृषातका आश्श्वयुज्ज्यामथ स्स्यादाग्ग्रहायणी ॥२०८॥
पूर्वेद्द्युरष्टका कृत्त्येऽष्टकापूर्वतिथौ स्मृते ।
अष्टका त्त्वष्टमीश्राद्धे मार्गाद्द्यपरपक्षगे ॥२०९॥
अन्न्वष्टका तु नवमीश्राद्धे स्यादष्टकानुगे ।
अथेशानबलिश् चैत्त्रीकर्म शूलगवोऽपि च ॥२१०॥
शाखापशुस् स्मार्तपशुर् यश् शाखायान् नियुज्ज्यते ।
गोयज्ज्ञस् स्याद् रौद्द्रचरू रुद्द्रार्थश् पायसश् चरुः॥२११॥
पाकयज्ज्ञा आत्मसँस्कारार्थकाश् पार्वणादिकाः।
हुतोऽहुतश् च प्प्रहुतश् प्राशितश् चेति तद्भिदाः ॥२१२॥
हलस्स्य विधिनाऽपूर्वा युक्तिर् लाङ्गलयोजनम् ।
इन्द्रयज्ज्ञस् तथा सीतायज्ज्ञो नव्व्यान्नप्राशनम् ॥२१३॥
उतूलपरिमेहश् च वृषोत्सर्गादयश् च दिक् ।
रजस्स्वलाव्रतन् दृष्टरजसो नियमे स्मृतम् ॥२१४॥
तत् पुत्त्रमन्थकर्मेष्टापत्त्योत्पत्त्यै हि यच् छ्रुतम् ।
गर्भाधानन् निषेकश् च स्याद् यथर्तुप्प्रवेशने ॥२१५॥
आधानिकञ् च यौनञ् च प्प्राजापत्त्यञ् च मौलिकम् ।
पौंस्नम् पुंसवनङ् कूर्मपित्तन् तूदशरावके ॥२१६॥
सीमन्तकर्म सीमन्तस् सीमन्तोन्नयनञ् च तत् ।
जातकर्माऽत्त्र द्वारेऽग्निस् सूतिकाऽग्निश् प्रकीर्तितः॥२१७॥
नामकर्माऽऽमन्त्रणिकं स्यान् नामकरणञ् च तत् ।
स्यान् निष्क्रमणिका सूर्यदर्शने हि यथाविधि ॥२१८॥
स्यादन्नप्प्राशनम् प्राशनिकायाम् भक्तखादिका ।
लौकिकाग्निस् तु निर्मन्थ्यश् शान्त्यादौ सँस्कृतोऽनलः॥२१९॥
चौले तु चूडाकरणञ् चूडाकर्म च चौडकम् ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

केशपाशी हि कम्बुजा कृता मूर्द्धिन यथाकुलम् ॥२२०॥
अग्न्याधानन् तथैवाऽग्न्याधेयं श्रौताग्निसाधनम् ।
ऋत्त्विजस्तु धनैर्वार्या ब्रह्म्मादद्या याजकास् स्मृताः॥२२१॥
वीरास् सबाधो भरता महिषा वृक्तबर्हिषः ।
मरुत४ कुरवो देवयवो देवा यतस्रुचः ॥२२२॥
उन्नेतारस् स्त्रियां होत्रा धिष्ण्यास् स्तोमास् सचाभुवः ।
ब्रह्म्मा सुविप्प्रस् स्याद् बार्हस्पत्त्य ऋत्त्विग्भिषक्तमः॥२२३॥
उद्गाता सामविद् यज्ञे देवतासामगायकः ।
होतोक्थशाश् च ऋग्वेदी स्यादाग्नेयो जुहूश् च सः॥२२४॥
अद्ध्वर्युश् च प्प्रयज्ज्युश् च यज्ञनीश् च यजुर्विदि ।
ब्राह्म्मणो ब्राह्म्मणाच्छंसी पोताऽग्नीदग्निमिन्धकः॥२२५॥
आग्नीद्ध्रश् चाऽथ प्रस्तोता प्रतिहर्ता तत४ परः।
सुब्रह्म्मण्यो द्वयोश् चाऽथ मैत्त्रावरुण इत्त्यपि ॥२२६॥
शंस्ता प्रशास्ताऽच्छावाको ग्रावस्तुद् ग्रावग्राभकः।
उपयष्टा प्प्रतिप्प्रस्थाता नेष्टोन्नेत ऋत्त्विजः॥२२७॥
क्रमाद् गणाभ्यन्तरास् स्युस् त्रिका ब्रह्म्मगणादिषु ।
सर्वे होत्त्राशंसिनस् तेऽद्ध्वर्य्वन्तास् तु महर्त्विजः॥२२८॥
केषाञ् चित् स्यात् सप्तदशस् सदस्स्य४ प्रत्त्यवेक्षकः ।
सभासदस् सभास्तारास् सब्भ्यास् सामाजिकास् समाः॥२२९॥
हविर्यज्ञर्त्विजो ब्रह्म्मा होता चाऽद्ध्वर्युरित्त्यपि ।
तथैव मैत्त्रावरुणोऽग्नीच् च घर्मर्त्विजस् त्वमी ॥२३०॥
ब्रह्म्मा होतोपयष्टाऽग्नीत् प्रस्तोताऽद्ध्वर्युरित्त्यपि ।
मद्ध्यत४कारिणो ब्रह्म्मोद्गाताहोतृसभासदः॥२३१॥
यष्टा सोमे होत्त्रकास् तु ब्राह्म्मणाच्छंसिना युताः ।
मैत्त्रावरुणनेष्ट्रच्छावाकाग्नीद्ध्राख्यऋत्त्विजः॥२३२॥
पत्नी वाऽग्नीद् वा हविष्कृद् हविष्करणकर्मतः।
उपस्तुदुपगश् चोपवक्तोद्गातुर् हि पूरुषाः॥२३३॥
प्रतिप्प्रस्थात्त्रादयस् स्युश् शमितार४ पशोर् वधात् ।
अद्ध्रिगुश् शमिता दैव्व्यो मानुषीऽप्प्युपचारतः॥२३४॥
चमसाद्ध्वर्यवस् सोमर्त्विजश् चमसहोमिनः।
सावद्या ब्रह्म्मादिको ब्रह्म्मप्रभृत४ प्रतिपूरुषः॥२३५॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अङ्गसँस्कारकर्माणोऽनृत्त्विजꣳ परिकर्मिणः।
सोमप्प्रवाकस् सोमार्थवँ वरीतुमृत्त्विजो गतः॥२३६॥
आर्त्विजीनस् स विप्प्रस् स्याद् य ऋत्त्विक्कार्यमर्हति ।
ज्ञातस् स्यात् पितृमान् पैतृमत्त्यो ज्ञातकुले भवः॥२३७॥
ज्ञातोऽनूचान आर्षेय ऋषिस् सुधातुदक्षिणः।
दक्षिणीयो दक्षिणार्हस् तथा दक्षिणण्य इत्त्यपि ॥२३८॥
आर्त्विज्ज्यमथ ब्रह्म्मत्त्वमौद्गात्त्रं हौत्त्रमेव च ।
आद्ध्वर्यवम् प्रातिहर्त्रं सुब्ब्रह्म्मण्ण्यात्त्वमित्त्यपि ॥२३९॥
औन्नेत्त्रङ् ग्रावस्तोत्त्रीया चाऽऽग्नीद्ध्रीयादिकन् च दिक् ।
आद्ध्वर्यवन् च प्प्राशास्त्रं होत्त्रम् पोत्त्रन् च ब्राह्म्मणम् ॥२४०॥
नेष्ट्रमाग्नीद्ध्रमद्ध्वर्य्वादिलिङ्गादि यथाक्रमम् ।
यजमानो यज्ज्ञपतिर् यष्टाऽऽदेष्टा धृतव्व्रतः॥२४१॥
क्राणस् सूरस् सग्म इन्द्रो यजत्त्रꣳ करणो मखः।
प्रजापतिर् मामहानोऽरिश् च सूरिर् हविष्कृतिः॥२४२॥
हव्व्यदातिश् च नृपतिर् देवावीश् चर्षणिर् व्रती ।
मघवान् यज्ज्ञवाहाश् च हवमानश् च प्राविता ॥२४३॥
कारुꣳ कृत्नुर् जायु-यज्ज्यू अवस्स्युस् सुम्नयुर् मनुः ।
इज्ज्याशीलो यायजूको यजीयानैज्ज्य इत्त्यपि ॥२४४॥
यज्ज्ञो मेधोऽद्ध्वरो याग इष्टिरिज्ज्या मखꣳ क्रतुः ।
नर्यो मियेधꣳ प्रावित्त्रोऽवभृथस् सुभगो विशः॥२४५॥
उक्थस् स्तोमो नराशंसो वेनो नीथश् च हर्यतः।
शिपिविष्टस् समर्यश् च पुरुषꣳ प्रभृथो भगः॥२४६॥
सधमादो होतृवूर्यश् चतुश्शृङ्गश् च सौभगः।
सुम्नवँ वितानमातानयँ यजत्त्रन् च ऋतन् नमः॥२४७॥
बर्हिर् नृपाय्यवँ विदथो देववीतिश् च दीधितिः।
दिविष्टिश् च गविष्टिश् च देवतातिꣳ प्रजापतिः॥२४८॥
तन्तुर् गातुर् विष्णुरिन्दुर् भुज्ज्युस् सयँयद्वसुर् विराट् ।
विपश्चिद् धर्म कर्माऽऽत्मा केतुर् यामा बृहँस् त्रिवृत् ॥२४९॥
होत्त्रा तथा सुतर्मा नौरभिपित्त्वन् च सुम्म्नहूः।
यागस् तु यजतौ होमो जुहोताविति चेष्ष्यते ॥२५०॥
अद्ध्वरो वार्षिकीज्ज्या स्यात् सग्ग्रहेज्ज्या मखस् तथा ।
अरणिर् निर्मन्थ्यकाष्ठे मन्थाधारेऽधरारणिः॥२५१॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

याऽस्याश् शेते प्राक् प्रमन्थयोनिस् सैवोत्तरारणिः।
अरण्यौ द्वे सवृँवरणे वृषास्वौ चाऽपि ते स्मृते ॥२५२॥
मन्थतीर्थन् देवयोनिरधरारणिगुह्यकम् ।
प्राच्यामग्नेर् निर्गमाय तीर्थाद् मार्गो हि वाहिनी ॥२५३॥
प्रमन्थ उत्तरॠ काष्ठन् तीर्थस्स्थञ् चात्त्रबुध्नगम् ।
ओबिल्ल्या सङ्गतङ् काष्ठञ् चात्त्रम् मन्थी प्रमन्थधृक् ॥२५४॥
चात्त्रमूर्धस्स्थितङ् काष्ठं स्यान् निष्पीडनमोबिली ।
नेत्त्रम् मन्थनरज्जुस् स्याद् गोवालैस् सशणैॠ कृतः॥२५५॥
मुष्टिब्भ्याम् मन्थने ग्राह्य्ये मुष्टी नेत्त्रान्तकाष्ठिके ।
इदम् मन्थनयन्त्रं स्यादग्निमन्थनयन्त्रकम् ॥२५६॥
मौञ्जॠ कुलायोऽथो दर्भपिञ्जूलन् दर्भसप्तकम् ।
सम्भाराॠ पुंसि सामग्ग्यस् तत्तत्कर्मोपकारिकाः॥२५७॥
तेऽग्न्याधानादिसम्भारा नर्यूषाॠ क्षारमृत्तिकाः।
मृत्तिकाऽऽखूत्करश् चाखुकरीषम् मूषिकोच्चिता ॥२५८॥
उपोदिकासम्भृता मृत् स्याद् वल्मीकवपा वपा ।
सूदोऽशोष्य्यजलाधारमृत्तिकाऽथ वराहकैः॥२५९॥
वन्त्यैर् मुखेनोत्कीर्णा मृद् वराहविहतम् मतम् ।
शर्करा क्षुद्द्रपाषाणे नदीजे बालुकास्थिते ॥२६०॥
प्रसिद्धाश्श्वत्थको ग्रामचैत्त्यो ग्रामादिचिह्न्नकः।
विहारो देवयजनयँ यज्ञवास्त्वृतधाम च ॥२६१।
सधमादो यज्ञवाटॠ कुम्बा सुगहना वृतिः ।
अथाऽग्निहोत्त्रशालायावँ विताना्ऽग्निगृहे समे ॥२६२॥
अग्निकुण्डयँ योनिराष्ट्री धिष्ण्यमायतनङ् खरः ।
अग्निकुण्डादिपरिधौ वृतिर् या मेखला हि सा ॥२६३॥
वेदिॠ खाता मिता भूमिर् यज्ञे स्थण्डिलमुन्नता ।
कोणौ तु पाश्चात्त्यौ वेदेश् श्रोण्ण्यावंसौ तु प्राग्भवौ ॥२६४॥
वेदिमद्ध्ये सन्नमने अखाते मद्ध्यसङ्ग्रहौ ।
इष्ष्यते यजतिस्स्थानन् दक्षिणे मद्ध्यसङ्ग्रहे ॥२६५॥
मद्ध्यसन्नमनेऽन्न्यस्मिञ् जुहोतिस्स्थानमिष्ष्यतें ।
याज्ञावकरराशिस् स्यादुत्करो वेदिकोत्तरे ॥२६६॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्याद् विहारे प्प्रवेशादेर् मार्गस् तीर्थमुपोत्करे ।
दक्क्षिणांसन् दक्क्षिणेन स्याद् ब्रह्म्मासनमग्ग्रयम् ॥२६७॥
तत्पश्चात् स्याद् याजमानसदनन् चतुरस्स्रकम् ।
स्थानमुत्तरपूर्वेणोत्करमाग्नीद्ध्रमिष्ष्यते॥२६८॥
उत्तरेणोत्तरां श्रोणिं स्याद् होतृषदनं स्थितम् ।
स्थानम् प्रत्त्यगुदीच्च्यांसाद् यजमानासनादुदक् ॥२६९॥
यत् तदद्ध्वर्युसदनन् तथोदक्श्रोणिकोत्तरे ।
पत्नीस्थानङ् गार्हपत्त्यादवाच्च्यां स्थितमासनम् ॥२७०॥
प्रकृतौ यावती वेदिस् स्याच् चेद् द्विस् तावती क्वचित् ।
सा द्विस्तावा वेदिरेवन् त्रिस्तावा वेदिरित्त्यपि ॥२७१॥
प्रकृतिस् साङ्गोपदेशा विकृतिस् त्वतिदेशभाक् ।
रज्जुस् स्पन्द्या वष्टिका च वटी शुल्बवँवराटकम् ॥२७२॥
करणी दण्डरज्जुश् च क्क्षेत्त्रायाममिता वटी ।
अथ द्द्विकरणी वेद्द्या त्रिकरण्ण्यादयोऽपि च ॥२७३॥
पार्श्वमानी दीर्घप्रान्तविस्तारेण मिता वटी ।
तिर्यङ्मानी परीणाहप्प्रान्तमात्त्री वटी स्मृता ॥२७४॥
कर्णोऽक्क्ष्णया चतुष्कोणे रज्जुस् सान्तरकोणगा ।
पृष्ठ्यासूत्त्रङ् क्षेत्त्रमद्ध्येऽनुदैर्घ्यम् प्रसृता वटी ॥२७५॥
अब्भ्यासो गुणितो भागो रज्जोर् वर्धित आगमः।
रज्ज्वन्तपाशो योगस् स्याद् रज्जुमानाविकारके ॥२७६॥
अक्क्ष्णयामानसिद्ध्यर्थं रज्ज्वान् चिह्न्नन् निरञ्छनम् ।
शङ्कौ प्रोता परीलेखे रज्जुस् स्याच् शङ्कुसम्मिता२७७
सैव तस्स्याः प्रतिनिधिर् वाऽपि कर्कटकस् स्मृतः।
अथ मण्डलमद्ध्यञ् च वृत्तकेन्द्रमुभे समे ॥२७८॥
यज्ज्ञायुधयँ यज्ज्ञपात्त्रयँ यज्ज्ञावचर इत्त्यपि ।
स्यात् प्रणीताप्प्रणयनम् प्रणीताचमसोऽपि च ॥२७९॥
शूर्पोऽस्त्री प्रस्स्फोटनं स्यवँ वर्षवृद्धञ् च तच् छ्रुतौ ।
हविर्ग्रहण्ण्यग्निहोत्त्रहवणी श्रपणी स्रुवा ॥२८०॥
स्रुग् घृताची च हवनी तथैवाऽऽघारणा च सा ।
जुहूर् हंसमुखी पर्णमयी स्रुक् पाणिपुष्करा ॥२८१॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

जुहूसमीपे ध्रियते याऽऽश्श्वत्थी स्रुग् हि सोपभृत् ।
वेद्द्यायँ या निश्चला शेते स्रुग् ध्रुवा सा जुहूनिभा॥२८२॥
अङ्गुष्ठपर्वद्द्वयखा दर्विः प्रादेशमात्त्रिका ।
स्रुगादेः पृथुले भागे पुष्करञ् च कपुच्छलम् ॥२८३॥
मुखे प्प्रसेको निर्वाहो वृन्ते दण्डश् च प्रग्ग्रहः।
इडापात्त्रमिडापात्त्री स्यात् षडवत्तधान्न्यपि ॥२८४॥
प्राशित्त्रहरणं रौद्द्रभागप्प्रापणपात्त्रके ।
स्फ्यो वज्ज्रश् चाऽरत्निमात्त्रः खादिरः खड्गकस् स्मृतः॥२८५॥
लोके प्रसिद्धं शकटमग्निष्ठयँ यज्ज्ञकर्मणि ।
कपालम् मृन्मयमृजीषकन् तृप्प्रकपाचनम् ॥२८६॥
शम्म्या च कुक्कुटो दण्डी ह्यष्टकुम्बा गदाकृतिः।
कूर्चः कौशम् बाहुमात्त्रञ् जुहूधारणपीठकम् ॥२८७॥
शृतावदानन् त्वखात-पुष्करे दारुहस्तके ।
पिष्टसयँयवनो दण्डः फलकाग्ग्रो हि मेक्षणम् ॥२८८॥
चरुपाकोपयुक्तन् तच् चरुमेक्षणमुच्च्यते ।
यज्ज्ञायुधङ् खण्डक्षुरप्प्राभं स्त्र्याज्ज्यविलापनी ॥२८९॥
धृष्टिस् स्यात् परिवेष्ट्री चोपवेषो वेष इत्त्यपि ।
अभ्रिर् नारी खदिरजा तीक्ष्णशासा खनित्त्रिका ॥२९०॥
फलकेऽन्तर्धानकट आश्श्वत्थेऽर्धविधूपमे ।
पत्नीसन्नहनयँ योक्त्रम् मुञ्जरज्जुविनिर्मितम् ॥२९१॥
प्रस्तरो हि जुहूस्थानस्स्तरणी कुशमुष्टिका ।
बर्हिस् तु वेद्द्यास्तरणकुशानाम् मुष्टयस् स्मृताः॥२९२॥
मुष्टिस् सोलपराजिस् स्याद् यो दर्भसदृशैस् तृणैः।
वेदस् तु कूर्चकः कौशस् स्याद् वेद्द्यादिप्प्रमार्जनः॥२९३॥
इद्ध्मोऽष्टादश पालाश्श्यस् समिधोऽरत्निसम्मिताः।
बाहुमात्त्र्यः परिधयस् ताश् शंस्यम् परितः कृताः॥२९४॥
अग्नेरग्ग्र्या अंशका हि भुवपत्त्यादयस् त्रयः ।
यूनन् दर्भद्द्वादशककृतमिद्ध्मादिशुल्बकम् ॥२९५॥
इद्ध्मस्स्य च्छेदने काष्ठशकलं हीद्ध्मव्रश्चनम् ।
उदगग्ग्रौ प्रस्तरादिधारकौ विधृती कुशौ ॥२९६॥
चातुष्प्राश्यौदनो ब्रह्म्मौदन ऋत्त्विग्भ्य ओदनः।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गोअग्ग्रायान् दक्षिणायावँ विप्प्रेष्टायावँ वरस् स्मृतः॥२९७॥
उद्धारो मन्थनेनाऽग्नेर् जननेऽरणितो बलात् ।
अथाऽनुगमनवँ वह्न्नेर् निर्वाणेऽनुगतिश् च सा ॥२९८॥
स्यादन्न्वारम्भणञ् चान्न्वालम्भनं स्पर्शनार्थकम् ।
गार्हपत्त्यस् त्वजस्स्रोऽग्निर् वेदेः पश्चाद् यमश्चसः॥२९९॥
अहिर्बुद्ध्न्यो गृहपतिः पवमानः प्रजापतिः।
नर्यश् चाऽयम् प्राजहितोऽन्न्यश् चेत् स्याद् गार्हपत्त्यकः॥३००॥
अग्निराहवनीयस् स्याद् वेदेः प्राक् समवस्स्थितः।
स हव्व्यवाहनश् शंस्यः प्राचीनञ् ज्योतिरिन्द्रकः॥३०१॥
दक्षिणाग्निरथर्यस् स्यादथर्युश् शुक्र इत्त्यपि ।
तथान्न्वाहार्यपचनोऽजस्स्रोऽयञ् चेदनर्यजः ॥३०२॥
अनित्त्यत्त्वेऽयमानाय्यो गार्हपत्त्यात् समुद्धृतः ।
श्रपणो गार्हपत्त्यो वाऽऽहवनीयोऽपि पाचनात् ॥३०३॥
वैतानिकाश् च वैताना एते त्त्रेता त्त्विदन् त्रयम् ।
होत्त्रा-ऽग्निपत्नी धिषणा वरू(रु)त्त्री भारती पृथक् ॥३०४॥
सब्भ्यः प्रवचनाद्द्यर्थसभायामाहितेऽनले ।
स एव स्स्यात् पावनश् चाऽनश्नत्साङ्गमनोऽपि च ॥३०५॥
एतेब्भ्य उद्धृतो भस्मोच्चयोऽसन्पांसवो मतः ।
ग्रामाग्निरप्प्रणीतोऽग्निः प्रणीतस् सँस्कृतोऽनलः॥३०६॥
पूर्णाहुतिः पूर्णदर्वम् पूर्णदर्व्या कृताऽऽहुतिः।
होमस् स्यात् सवनं होत्त्रं हवनं हुतिराहितिः॥३०७॥
तनूहवींष्याधानाङ्गपवमानेष्टयस् स्मृताः।
उपसर्जन्न्य उष्णापः पिष्टसयूँयवनार्थिकाः॥३०८॥
पुरोडाशस् तप्तजलसाधितम् पिष्टपिण्डजम् ।
कूर्माकारन् देवतार्थङ् कपाले सँस्कृतं हविः॥३०९॥
यज्ञप्प्रभावसम्पत्तिफलन् दानं हि दक्षिणा ।
उच्चा स्स्तावा च साऽथाग्न्याधेयिकी पौर्णमासिकी ॥३१०॥
दार्शिकी चैष्टिकी सौत्त्रामणिकी पाशुबन्धिकी ।
पाशुकी सौमिकी चाऽऽग्निष्टोमिकी राजसूयिकी ॥३११॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पौनराधेयिकी दार्वीहोमिकी वाजपेयिकी ।
ऐकाहिक्क्याहीनिकी चाऽऽद्ध्वरिकी द्वादशाहिकी ॥३१२॥
आश्श्वमेधिक्क्यादयश् चाऽऽदिष्टासु दक्षिणासु दिक् ।
आदिष्टदक्षिणायास् तु साऽधिका भूयसी स्मृता ॥३१३॥
ऋबीसपक्क्वं स्याद् भूमिगर्तोष्मणि विपाचितम् ।
शेतेऽग्नेर् हि समीपे यो व्रत्त्यग्निमुपशाय्यसौ ॥३१४॥
अग्न्याहितश् चाऽऽहिताग्निर् नग्नस् तु स्यान् निरग्निकः।
पर्याधाताऽनुजः पर्याहितोऽग्ग्न्योऽग्निक्रमात्त्ययात् ॥३१५॥
अग्निहोत्त्रन् तु वैतानेऽग्नौ सायम्प्रातराहुतिः।
अग्निहोत्त्री हविर्धानी होमधेनुश् च गौरिह ॥३१६॥
नित्त्यादग्नेरनित्त्यस्स्योद्धारे विहरणं स्मृतम् ।
श्रपणार्थं सुप्प्रदीप्ताङ्गारोद्धारे निरूहणम् ॥३१७॥
तृणाग्निभासनमवज्ज्योतनं स्यात् परीक्क्षणे ।
अथोन्नयनमाज्ज्यादेस् स्रुवेणोन्नयनं स्रुचि ॥३१८॥
नीचैर्ग्रहे निग्ग्रहणमुच्चैरुद्ग्रहणं स्मृतम् ।
उदिङ्गनम् प्रकम्पो निर्-लेहस् स्वादोऽग्ग्रजिह्व्वया ॥३१९॥
तमोब्भ्ययस् तमःप्राप्तौ धूप्प्यमानः प्रधूमिते ।
स्यादर्चिःप्रत्त्यवायस् तु ज्वालाशान्तेरुपक्क्रमे ॥३२०॥
अथ सर्वँव्रजनं ह्य्यग्नेरगारान् निष्क्रमे मतम् ।
प्रवासोऽग्निगृहं हित्त्वा होमकालस्स्य यापनम् ॥३२१॥
स्यात् समारोपणवँ वह्न्नेररण्योरथवाऽऽत्मनि ।
आरोहाय प्प्रार्थना चाऽऽरूढत्त्वेन च चिन्तनम् ॥३२२॥
उपावरोहणन् त्वग्नेः प्रार्थनाऽग्नौ हि लौकिके ।
निर्मन्थ्ये वाऽवतारायाऽवतारस्स्य च कल्पनम् ॥३२३॥
अग्निहोत्त्री त्त्वग्निहोत्त्रहोम्म्युषन्नग्निहोत्त्रहुत् ।
वीरोज्झस् सोऽग्निहोत्त्रयँ्यो न जुहोति स्स्वयं समाम्॥३२४॥
नष्टाग्निर् वीरहा जल्हुस् सोऽग्नीनुत्सादयेद् धि यः।
अग्निहोत्त्रच्छलाद् याच्ञापरो वीरोपजीवकः॥३२५॥
वीरविप्प्लावको जुह्व्वद् धनैश् शूद्द्रसमाहृतैः।
इष्टिरन्वारम्भणीया प्रागग्ग्न्यात् पूर्णमासतः॥३२६॥
पूर्णमासश् च दर्शश् च पक्क्षान्तेष्टिः क्रमाद् द्वयी ।
सा दाक्क्षायणयज्ज्ञस् स्यात् प्रयोगे गुणिता यदि ॥३२७॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

उपवासस् तु शास्त्रोक्तभोज्ज्यादिनियमग्रहे ।
अथ व्रत्यमहश् चोपवसथश् चौपवस्त्र(त)कम् ॥३२८॥
अन्वाधानङ् कर्मसूचि समिदाधानमग्निषु ।
व्रत्यवँ व्रतोपायनीयं हविष्ष्यम् भोज्ज्यमाज्ज्ययुक् ॥३२९॥
स्यात् पात्त्रासादनम् पात्त्रनिधानन् न्युब्जितन् द्विशः ।
अवकृष्टोऽयुतेऽथाऽभिनिधानं स्यान् निपीडनम् ॥३३०॥
पवित्त्रकरणन् त्वद्भिः पवित्त्रस्स्यानुमार्जनम् ।
आक्षिप्प्य कम्पनन् धूलिक्षेपादाववधूननम् ॥३३१॥
निधानं स्यादावपनं स्यादुद्वपनमुद्धृतौ ।
कण्डनङ् कुट्टनमवहननन् तुषमोचने ॥३३२॥
तुषादद्युड्डायने शूर्पकृते निष्पवनन् तथा ।
स्यात् परापवनम् बीजपृथक्कारे विवेचनम् ॥३३३॥
स्यात् फलीकरणम् भूयःकण्डनादुज्ज्वलीकृतिः ।
अत्र सूक्ष्मतुषोन्मिश्श्रास् स्युः फलीकरणाः कणाः ॥३३४॥
पिष्टीकारे पेषणम् प्रस्कन्दनम् प्रोहणं समे ।
स्यात् कपालोपधानं हि पाके कर्परयोजनम् ॥३३५॥
अब्भ्यूहनाच्छादने सयूँयवनम् मुक्षणे स्मृतम् ।
ष्ठ्यूतादग्नेरप्सु जाता आप्त्यास् त्रितद्द्वितैकताः॥३३६॥
खाता हार्या च मृद् दर्भश् चाऽपि स्तम्बयजुस् स्मृतम् ।
प्रतिपत्तिक्क्रिया सा यज् जाते कार्ये नियोजनम् ॥३३७॥
अन्वाहार्योऽथर्यपक्क्वे स्यादृत्त्विग्दक्षिणौदने ।
प्रवणङ् क्रमशो निम्नञ् जलप्प्रवहणे क्षमम् ॥३३८॥
आहार्योऽन्न्यत आनेये पुरीषङ् खातमृत्तिका ।
उपांशिवष्टौ प्रचरणङ् क्षालने त्त्ववनेजनम् ॥३३९॥
प्रवेशश्य गूहने ह्युद्गूहनम् बन्धस्स्य मोचने ।
विस्स्रंसनं स्यादुत्खायोद्धरणे स्स्यादुदूहनम् ॥३४०॥
शक्तीकारे कल्पनं स्यादथाऽऽज्ज्यस्स्य हि सेचने ।
होम्म्यस्स्य हविषस् स्थाने स्यादुपस्तरणन् तथा ॥३४१॥
हविषस् तूपरि घृतधारादानेऽभिघारणम् ।
प्रत्त्यञ्जनं स्यादवत्तदेशे घृतनिषेचनम् ॥३४२॥
उपघातोऽवदानं स्यादवत्तन् तु पृथक्कृतम् ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

पृच्छाऽनुज्ज्ञाप्रार्थनं स्यादनुज्ज्ञा प्प्रसवः पुमान् ॥३४३॥
प्रैषो यजेत्त्यादिकान्तयँ यजुस् स्यात् प्रेषणे श्रुतम् ।
सामिधेन्न्योऽनुवाच्च्यास्स्युर् ऋचो ह्यग्नेस् समिन्धने॥३४४॥
धाय्या समिद्धवत्त्याः प्राग् योज्ज्य ऋग् विकृतिष्ष्विह ।
प्रणवो मन्त्रवाक्क्यान्तस्स्वरादेस् स्थान ओकृति:॥३४५॥

अन्तश्श्वासमनाकर्षन्ननवानन्ननुच्छ्वसन् ।
स्याद् वातकरणन् तूपवाजनञ् चोपवीजनम् ॥३४६॥
आघारो घृतधाराऽग्नौ प्राची सूब्जा च सन्तता ।
समञ्जनन् तु द्ध्रौवाज्ज्ये जौहवाज्ज्यस्स्य पातनम् ॥३४७॥
अग्नीत्प्रेषणमो श्रावयेत्त्याश्श्रावणमाश्श्रुतम् ।
अस्तु श्श्रौषट् तु प्रत्त्याश्श्रावणम् प्रत्त्याश्श्रुतञ् च तत् ॥३४८॥

प्रयाजाः पूर्वाङ्गयागास् समिदादिकदेवता:।
आप्प्रियस् तु प्प्रयाजेषु याज्ज्यात्त्वेन श्श्रुता ऋच:॥३४९।

उपाय्यागन्तुरुपरिस्थापनेऽद्ध्यूहनम् मतम् ।
जुह्वाः प्राच्च्या उपभृतोऽवतारेऽवहृतिस् स्मृता ॥३५०॥
अग्नीषोमावाज्ज्यभागौ स्यातान् तद्वण्टकावपि ।

पुरोनुवाक्क्याऽनुवाक्क्या ऋग् यष्टव्व्यानुकूलनी ॥३५१॥
पुरोरुगृग् ग्रहादीनाङ् ग्रहणे या प्रयुज्ज्यते ।
याज्ज्याऽऽगूःपूर्वकवँ वाक्क्यवँवषट्कारान्तमुच्च्यते॥ ३५२॥

यद् "ये यजामहे" दैवे पित्र्ये यद् "ये स्वधामहे" ।
तद् वाक्क्यमभिगूर्तं स्यात् स्त्र्यागूरागूर्तमित्त्यपि ॥३५३॥

वौषट् तु स्स्याद् वषट्कारः पित्र्ये स स्स्यात् स्वधानम:।
स्युश्चात्र वौक्षाड् वौषाड् वौग् वौभ्रगवड्वाट्फडादय: ॥

वीतवँ वेत्त्वाद्ध्यनुवषट्कारो वौषट् पुनः कृत:।
याज्ज्या पुरोनुवाक्क्या च याज्ज्यापुटमिति द्द्वयम् ॥३५५॥
होत्रा तूच्चैः प्रयोज्ज्यानि यजूंषि निगदास् स्मृता:।
निविद् यजुर् होतृपाट्ठ्यन् देवताया निवेदनम् ॥३५६॥

याज्ज्यानुवाक्क्ये सयँयाज्ज्ये स्यातां स्विष्टकृति श्श्रुते ।
स्विष्टकृत् तु भवेत् सोऽग्निरिष्टं स्विष्टङ् करोति य: ॥३५७॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

[illegible] यत् ।
ध्रुवायायँ यद् घृताधानन् तद् ध्रुवाप्प्यायनम् पुन: ॥३५८॥

CC-0. In Public Domain. Digitization by eGangotri

इडास् स्युर् यजमानेन युक्तानामृत्विजाङ् कृते ।
हुतशेषपुरोडाशाद्यवत्ता भक्ष्यभागकाः ॥३५९॥
उपहूताऽभ्यनुज्ञाताऽभ्यनुज्ञोपहवः पुमान् ।
अनूयाजा उत्तराङ्गयागा इष्टिषु चोदिताः ॥३६०॥
व्यूहनन् तद् युक्तयोर् यत् प्रेरणम् भिन्नयोर् दिशोः ।
सूक्तवाको भद्रवाच्च्ये देवजुष्ट्यादिवाचके ॥३६१॥
शयूँयुवाकश् शयूँयुवति मन्त्रे स्यात् स्वस्तिप्रार्थने ।
पत्नीसयूँयाजस् तु देवपत्नीभागयुतो यजिः ॥३६२॥
स्यात् समिष्टयजुर् होमो ध्रौवाज्ज्यो वातदैवतः ।
पूर्णमासावभृथकः प्रणीतानावँ विमोचनम् ॥३६३॥
पूर्णपात्रनिनयनम् पूर्णपात्रस्स्य न्युब्जनम् ।
विष्णुक्क्रमा याजमानाश् शास्त्रोक्ताः प्रक्क्रमास् त्रयः ॥३६४॥
यज्ञतृप्त्यै विप्प्रभोजनं स्याद् ब्राह्मणतर्पणम् ।
सँस्थोदृगपवर्गोऽन्तस् स्याद् यज्ञायुश् च सँस्थितिः ॥३६५॥
चरुस् ताम्म्री मृन्मयी वा स्थाली बिल्ल्वफलाकृतिः ।
वाममुष्टौ गृहीत्त्वाऽश्श्वपर्शुना वाऽसिदेन वा ॥३६६॥
सकृच् छिन्नाः कुशास् सकृदाच्छिन्नानि स्स्मृतानि हि ।
कव्व्यं स्यात् पित्र्यमन्नं हि पिण्डस् स्यादन्नगोलकः॥३६७॥
पिण्डदाने निपरणम् पित्र्योऽग्निः कव्व्यवाहनः ।
तमनम् प्राणरोधस् स्यात् प्राणभक्क्षस् तु शिङ्घनम्॥३६८॥
स्यात् पिण्डपितृयज्ञो हि दर्शपूर्वस्स्थश्राद्धके ।
यवागूस् ताण्डुली पक्तिर् बहुसिक्था द्रवान्न्विता ॥३६९॥
आतञ्चनङ् कृडीकारे स्याद् घनीकरणेषु च ।
सान्नाय्यन् तद् यदामिश्श्च्य दर्शे हव्व्यम् पयोदधि॥३७०॥
दद्ध्नः प्रक्क्षेपणाद् दुग्धे शृतोष्णे स्फाटिते सति ।
घनो भागःपयस्स्या चाऽऽमिक्क्षा स्याद्वाजिनन् द्रवः॥३७१॥
नवैर् यवैश् च श्श्यामाकैः कार्येज्ज्या व्रीहिभिश् च या ।
नवयज्ञश् चाग्ग्रयणं सा नवान्नेष्टिरित्त्यपि ॥३७२॥
अग्निहोत्त्रायणी योऽग्निहोत्त्रेणाग्ग्रयणन् चरेत् ।
चातुर्मास्स्यानि यज्ञास् ते श्रौता मास्सु चतुर्षु ये ॥३७३॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

चातुर्मासी हि तद्याजी स्याच् चातुर्मासकश् च सः ।
वैश्श्वदेवञ् च वरुणप्प्रघासास् साकमेधकाः ॥३७४॥
शुनासीरीयञ् च चातुर्मास्स्यर्त्तुमुखयज्ज्ञकाः ।
कुशप्प्रस्स्वᳵ फुल्लकुशाᳵ कुशोर्णा कुशमञ्जरी ॥३७५॥
करम्भपात्त्रं स्याद् यावपिष्टनिर्मितपारिका ।
पैष्टो मेषो मेषकस् स्यात् पैष्टी मेषी च मेषिका ॥३७६॥
शालाजिरश् शरावोऽस्त्री पिशीलवँ वर्धमानकः ।
रिक्तीकृता निरशिता शकलᳵ पर्णजा समित् ॥३७७॥
मारुती दक्क्षिणा वेदिᳵ प्रतिप्प्रस्थातृवेदिका ।
इडस्पदञ् च वसुनᳵपदमुत्तरवेदिका ॥३७८॥
नाभिश् चतुस्स्रक्तिरस्स्याम् मद्ध्ये प्रादेशसम्मिता ।
अथ शामित्त्रशाला स्यात् प्रतक्क्वा प्रम्म्रदोऽपि च ॥३७९॥
ऊबद्ध्यगोहस् तूवद्ध्यगर्तस् स्यादुत्करोत्तरे ।
चात्त्वालᳵ पवमानश् च मृदुद्धारादिगर्तकः ॥३८०॥
शम्म्या सचिह्न्ना स्यान् मानकाष्ठी द्वात्रिंशदङ्गुला ।
क्षामकर्षश् च निष्काषᳵ कुम्भ्यां श्लिष्टेऽल्पके चरौ ॥३८१॥
समानबर्हिस् समानतन्त्रं स्यादेकतन्त्रकम् ।
मन्थᳵ क्षुब्धश्च सक्तुस् स्यान्मुञ्चितो ह्युदकादिना ॥३८२॥
श्रौतेज्ज्याᳵ पशुसोमान्न्या हविर्यज्ज्ञास् तथेष्टयः ।
पशुबन्धास्तु पशवᳵ पश्श्विज्ज्याᳵ पाशुकेष्टयः ॥३८३॥
पशौ स्वतन्त्रनिर्व्यूढे निरूढपशुबन्धकः ।
यूपो वनस्पतिस् स्कम्भᳵ पशुबन्धार्थमुच्छ्रितः ॥३८४॥
उपस्थस् सोऽग्निपार्श्वस्थोऽग्निष्ठोऽग्नेस् सम्मुखे स्थितः ।
निखेयᳵ पञ्चमो भागोऽस्स्याऽतष्ट उपरोऽस्त्रियाम् ॥३८५॥
स्यात् परिव्व्ययणयँ यूपरशनाबन्धनस्स्थलम् ।
परिवेष्टनभाग् यूपᳵ परिवीर् वैदिकैस् स्मृतः ॥३८६॥
पृथुता स्थूलता स्थौल्ल्यं स्थविमा प्रथिमा पुमान् ।
चषालो यूपकटकोऽष्टाश्श्रिर् मद्ध्यानतᳵ पृथः ॥३८७॥
यूपाग्ग्रे प्रतिमोकाय च्छिद्द्रन् तरद्द्म चषालके ।
चषालतरद्द्मातिकान्ता तर्म यूपाग्रमनूढिका ॥३८८॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्थाणुर् भूमिष्ठोऽवशिष्टोंऽशो वृक्षच्छेदने मतः ।
आव्रश्चनश् छेददेशो यूपव्रस्कस् तु यूपकृत् ॥३८९॥
परिमायातिरिक्तस्य च्छेदनम् परिवासनम् ।
यूपतक्षणजस् त्वाऽऽद्यस् त्वक्खण्डश् शकलं स्वरुः ॥३९०॥
पर्यूहणम् पूरणे पर्यर्षणङ् खदने स्मृतम् ।
मैत्रावरुणदण्डस् तु प्रशास्तुर् दण्ड उच्च्यते ॥३९१॥
प्रहार्योऽतिप्प्रणीतश् चोत्तरवेदौ हृतोऽनलः ।
शामित्रोऽग्निर् हि पश्श्वङ्गहविषः पाचनेऽनले ॥३९२॥
ब्लेष्क-मेष्क-व्लेष्क-वेष्कास् स्युः पशोर् गलपाशके ।
अभिष्ठानम् पदा किञ् चिदाक्रम्म्यास्योपरि स्स्थितिः ॥३९३॥
मारणे स्यात् सञ्ज्ञपनन् तमयित्त्वा क्रतौ कृते ।
परम्पराकं शमनम् प्रोक्षणञ् च वधार्थकम् ॥३९४॥
वाच्च्यलिङ्गाः प्रमीतोपसम्पन्नप्प्रोक्षिता हते ।
उपाकृतः पशुरसौ योऽभिमन्त्र्य क्रतौ हतः ॥३९५॥
मैत्रावरुण ऐन्द्राग्न आग्नावैष्णव-वैष्णवौ ।
सौमापौष्णः पौष्ण ऐन्द्रावैष्णवश् चैन्द्र इत्त्यपि ॥३९६॥
त्रैधातवश् च सावित्त्रो मारुतश् चाऽऽग्निमारुतः ।
ऐन्द्रवारुण ऐन्द्रावारुणश् चाऽप्प्याग्निवारुणः ॥३९७॥
सारस्स्वतो वैश्श्वदेवो धात्त्रस् त्रैयम्बकोऽपि च ।
सौमारौद्द्रो नैर्ऋतश् च त्त्वाष्ट्रो वायोधसस् तथा ॥३९८॥
रौद्द्रश् च शतरुद्द्रीयश् शतरुद्द्रिय इत्त्यपि ।
पार्जन्न्यश् चाऽथ माहेन्द्रो महेन्द्रीयो महेन्द्रियः ॥३९९॥
अग्नीषोमीयस् तथाऽग्नीषोम्म्योऽथो सौम्म्य एव च ।
ऐन्द्रासौम्म्यश् च वायव्य ऋतव्यः पित्र्य इत्त्यपि ॥४००॥
द्यावापृथिव्व्यादिकाश् च यामः कायश् च शुक्रियः ।
अपोनप्त्रीयादयस् स्युराग्नेयस् सौर्य इत्त्यपि ॥४०१॥
बार्हस्पत्त्यक्षैत्रपत्त्यादित्त्यास् स्युर् मासिकादयः ।
पशुप्प्रभृतयो मित्त्रावरुणादिकदेवताः ॥४०२॥
पन्नदो जातदन् मांसवँ वृथामांसमयज्ञियम् ।
छूरिकोभयतोधारा शासः कट्टारिकाऽसिका ॥४०३॥
पाटने स्याद् विशसनवँ वपोत्खेदो वपोद्धृतौ ।
उपयद् स्यात् पशुगुदखण्डस्स्य विधिनाऽऽहुतिः ॥४०४॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

मुखेतरच्छिद्रद्रसोमस्स्रावी सोमातिपूतकः ।
सौत्रामणी स्वतन्त्रा कौकिलसौत्त्रामणी मता ।४०५॥
चयनादेस् तु चरकसौत्त्रामण्ण्यङ्गताङ् गता ।
सुरासोमस् तु द्रव्व्ये स्स्यात् सुराभिषवणार्थके ॥४०६॥
यवा विरूढास् तोक्मानि शष्पाणि व्व्रीहयस् तथा ।
लाजा॰ पुम्भूम्नि लाजा स्त्री भृष्टस्स्फुटितधान्न्यके ॥४०७॥
सुराबीजङ् किण्ण्वमस्त्री नग्नहुर् नग्नहूर् नरि ।
मण्डो निष्पाव आचामश् चूर्णैर् युक्तस् स मासरः॥४०८॥
सुरा त्त्वोदनजे पेये सन्धानान् मादकीकृते ।
कारोतरस् स्यात् सुराया॰ पवित्त्रे वंशनिर्मिते ॥४०९॥
चप्पन्न् चप्प्यम् पिष्टपात्त्रं स्यात् सुरोदञ्चनादिकम् ।
सतम् पालाशपात्त्रं स्यान् महत् पूतसुरार्थकम् ॥४१०॥
दर्विहोमा॰ पौर्णमासधर्मास् तूष्णीम्प्रयोगकाः ।
अप्प्रयाजानुयाजाश् चैकाग्निसाद्ध्या हि यागकाः ॥४११॥
सोमेज्ज्यास् स्युस् सोमयागास् सोमा यज्ज्ञास् सवा मखाः।
ते सवैस् त्रिभिरेकाहास् तैरावृत्तैरहर्गणाः ॥४१२॥
तेऽहीना द्वादशाहान्ता दक्क्षिणाभिस् समन्न्विताः ।
अदक्क्षिणाश् चोभयतोऽतिरात्त्रास् सोमपीथिभिः ॥४१३॥
ब्राह्म्मणैरेककल्पैश् च कृतास् सत्त्राण्ण्यहर्गणाः ।
विमितं स्यात् समचतुरश्श्रे सौमिकमण्डपे ॥४१४॥
स्याद् दीर्घचतुरश्श्रेऽत्त्र शाला प्राचीनवंशके ।
साङ्काशिनन् द्वारमार्गो तथा साङ्कासनं स्रुतिः ॥४१५॥
पत्नीशालम् पत्न्यगारम् पश्चात् प्राजहिताद् गृहम् ।
सोमो दीक्क्षापतिर् विप्प्रो वीरो दक्क्षोऽमृतो हरिः ॥४१६॥
राजेन्दुश् चम्म्रिषस् सिन्धुर् मदोऽप्तुर् मदिरो विराट् ।
मधुपेयोऽतिथिर् मुञ्जो वृषपाणस् तपस्पतिः ॥४१७॥
चित्त्रबर्हिस् सद्मबर्हिर् गन्धर्वश् च वनस्पतिः ।
स्युरंशुमत्प्रभृतयस् सोमभेदास् स्वरूपतः ॥४१८॥
सोमकेदारिकास् सोमवप्प्राणि सुन्त्वताङ् गृहे ।
पूतिकाश् च तथाऽऽदारा उशानेत्त्योषधिस् तथा ॥४१९॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

हरित्कुशाश् चाऽप्प्यरुणदूर्वाश् च ब्राह्ममणार्थकाः ।
सोमालङ्कर्मीणकास् स्युर् न्यग्ग्रोधस्तिभयोऽन्न्यथा ॥४२०॥
सोमादेरपद्रव्व्यस्स्याऽपासका विचितस् स्मृताः ।
ध्रुवगोपस् सोमरक्षो राजन्न्यस् सोमरक्षकः ॥४२१॥
रक्षोपदेशेऽपदेशः प्रापणन् तु प्प्रपादनम् ।
अप्सुदीक्षा श्मश्श्रुकेशवपनस्स्नानसंस्कृतिः ॥४२२॥
वासःपल्पूलकाऽधौतममूत्त्रकृतमुच्च्यते ।
अधोवासःपरिहितौ नीविस् स्यादपवर्तिका ॥४२३॥
शृङ्गङ् कण्डूयनङ् कृष्णविषाणा दीक्षितस्स्य यत् ।
दीक्षितायाश् शिरोवेष्टजालङ् कुम्बकुरीरकम् ॥४२४॥
यष्टेष्टदीक्षणीयेष्टिर् दीक्षितो ब्राह्ममणोऽपि सः ।
दीक्षा निषच् च सोमाङ्गनियमादिपरिग्ग्रहः ॥४२५॥
एकदीक्षी तुल्ल्यदीक्षो दायार्हास् स्युरपिव्व्रताः ।
क्षीरव्व्रतः पयोभोजी पयोव्रत्त्युवसद्व्रती ॥४२६॥
वत्सश् चाऽथो व्रतपयोदा गौर् व्रतदुघा स्मृता ।
भद्द्रवँ वाच्च्यम् परिह्व्वालमरूहँश् चनसितो मतः ॥४२७॥
प्रायणीयं सोमयागप्प्रारम्भेष्टौ प्रकीर्तितम् ।
सुब्रूह्म्मणण्याह्व्वानमिन्द्रादद्याह्व्वानं सोमपीतये ॥४२८॥
राजासन्दी सोमकूर्ची शालाद्वार्यसमीपगा ।
महावीरस्स्य कूर्ची या सम्म्राडासन्दिका हि सा ॥४२९॥
मदन्त्यो मन्दतप्तापो दीक्षितोदकहेतवे ।
तानूनप्त्रन् तु ब्रह्म्मादद्यैः पात्त्रकेऽवत्तकङ् घृतम् ॥४३०॥
सतानूनप्त्रिणोऽन्न्योऽन्न्यन् तद्घृतस्स्यावमर्शकाः ।
परीशासौ सफौ सन्दंशकौ सम्म्राज उद्धृतौ ॥४३१॥
प्रवर्ग्यस् तु महावीरस् सम्म्राड् मखशिरोऽपि च ।
ब्रह्म्मणस्पतिरत्त्राज्ज्ये दुग्धक्षेपः प्रवृञ्जनम् ॥४३२॥
दुग्धन् तप्तघृते क्षिप्तङ् घर्मो गौस् तस्स्य घर्मधुक् ।
रुक्मस् तु राजते हैमे वा पत्त्रे परिमण्डले ॥४३३॥
पिण्डन् निर्बाधमाघातादेकतोऽन्न्यत उन्नतम् ।
धवित्त्रवँ व्यजनङ् कृष्णसाराजिनविनिर्मितम् ॥४३४॥
मेथी गोबन्धनस्स्थूणा मयूखा वत्सशङ्कवः ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

गोर् बन्धदामाऽभिधानी निदाने पादबन्धने ॥४३५॥
विशाखदाम वत्सस्य दोहपात्र्यौ तु पिन्न्वने ॥
इष्टिष्ष्वयश्शयाद्द्यासु तपांस्युपसदोऽपि च ॥४३६॥
सुत्त्यापूर्वदिनन् त्वौपवसत्थ्यमह उच्च्यते ।
शालादिपूर्वार्धस्तम्भम् पूर्वेण निहतो हि यः ॥४३७॥
शङ्कुस् सोऽन्तऌपात्त्य इतऌ प्राग् यूपावट्ट्य उच्च्यते ।
छदिश् तार्णे कटे भित्तिर् वेणुखण्डकिलिञ्जके ॥४३८॥
लस्पूजनी काष्ठसूचे स्त्र्युच्छ्रायी पार्श्वगे कटे ।
प्राकृताहवनीयोऽग्निस् सम्प्राप्तो गार्हपत्त्यताम् ॥४३९॥
शालामुखीयस् स्याच् शालाद्वार्यश् चाऽप्प्यजएकपात् ।
हविर्धानानसोर् गेहे स्याद् हविर्धानमण्डपः ॥४४०॥
सोमाभिषवणक्षायां श्वब्भ्रा उपरवास् स्मृताः ।
कृत्त्याविशेषो वलगस् तद्हा वलगहा मतः ॥४४१॥
खरस् स्यात् स्थण्डिलं सोमग्ग्रहपात्त्रादिसादनम् ।
प्राग्वंशात् प्राग् हविर्धानात् प्रत्त्यग् धिष्ण्यैर्युतङ् गृहम् ॥४४२
सदऌ क्रतुस्स्थलाऽऽस्थानी नादिराङ्गिरसी त्त्विषिः ।
समज्ज्या परिषत् पर्षत् सभासमितिसंसदः ॥४४३॥
अग्नयस्त्वत्त्र धिष्ण्यास् स्युर् होत्त्रीयाद्याश्च ते स्मृताः।
औदुम्बरी तु स्थूणाऽत्त्र स्यात् प्रागायाममद्ध्यगा ॥४४४॥
स्यातां स्थूणाकर्णकौ हि विशाखे वलधारणौ ।
सँस्तावस् स्ताव आस्तावस् सामगानप्प्रदेशकः ॥४४५॥
आग्नीद्ध्रागारमागारं सदउत्तरपूर्वतः ।
मार्जालीयस् तु सम्मार्गगृहे दक्षिणतस् स्थिते ॥४४६॥
जुहूरन्त्या प्प्रचरणी प्रेक्षणन् त्वनुदेशनम् ।
समौ कृशानुश् च बहिष्पवमानप्प्रदेशकः॥४४७॥
स्तोमायनास् स्युऌ पशवोऽग्नीषोमीयादिकास् सवे ।
एकादशानायँ यूपानायँ यूपैकादशिनी गणः॥४४८॥
पशुस् स ऐकादशिनो योऽत्त्र यूपे नियुज्ज्यते ।
मानं यस्स्यान् दशदश सा दशन्दशिनी श्रुतौ ॥४४९॥
वसतीवर्य आपस् स्युस् सोमसुत्त्यार्थमाहृताः ।
स्यात् प्रातरनुवाको हि शंसस् सुत्त्यादिनादने ॥४५०॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

तत्तद्देशेषु पात्त्राणां स्थापनम् पात्त्रयोजम् ।

CC-0. In Public Domain. Digitization by eGangotri

द्रोणी यज्ञे देवपात्त्रं स्याद् द्रोणकलशश् च सः ।४५१॥
सोमग्ग्रहणपात्त्रन् तूपयामस् सुभवो ग्रहः।
तत्त्राऽन्तर्यामादिकास् स्युर् नानालक्क्ष्मयुता ग्रहाः ॥४५२॥
स्थाल्ल्य आग्ग्रयणस्स्थाल्ल्याद्द्यास् तत्तद्देवतार्थिकाः।
द्विमुखं स्रुक्पुष्कराभं श्रैपर्णमृतुपात्त्रकम् ॥४५३॥
परिप्प्लवोदञ्चनी स्स्यात् क्लीबे पारिप्प्लवन् च तत् ।
सोमांशूनां संहरणी पात्त्री सम्भरणी स्मृता ॥४५४॥
सोमांशवस् सोमलतापर्वखण्डास् सुकुट्टिताः।
दशापवित्त्रञ् जीवोर्णाकृता सोमस्स्य चालनी ॥४५५॥
पवित्त्रञ् चालनीभागे दशा मार्जनभागके ।
कुम्भ आधवनीयस् स्यात् पिधानी सोमधावनः ॥४५६॥
पूतभृत् स्यात् पृथुमुखः कलशः पूतसोमभृत् ।
आहावा द्रोणकलशाधवनीयौ च पूतभृत् ॥४५७॥
चमसास् सोमपात्त्राणि वृन्तैर् नानाविधानि च ।
वनन् दारुमयम् पात्त्रं स्याद् द्रोणकलशादिकम् ॥४५८॥
उदकुम्भा एकधनास् तद्वानेकधनी स्मृतः।
निग्ग्राब्भ्याश् चमसापस् स्युर् यष्ट्रेऽद्ध्वर्युसमर्पिताः ॥४५९॥
सोमन् तु पिच्चितीकृत्त्य निग्ग्राब्भ्याः परिषिच्च्य च ।
रसादानेंऽभिषवणं सवनञ् च सवीम च ॥४६०॥
अभिषूतिश् च सुत्त्या च प्प्रसवोऽभिषवस् सवः ।
शुक्क्रस् सोमरसो द्रोणकलशे सारवान् स्थितः ।४६१॥
ऋजीषस् स्यादात्तसारस् सोमाद्द्यंशो हि नीरसः ।
आशिरा मिश्श्रणम् मृष्टीकरणे श्रयणम् मतम् ॥४६२॥
आशिरो दधिदुग्धाद्द्याः पदार्था मिश्श्रणार्थकाः ।
स्यान् महाभिषवः क्षुल्लकोपांश्वभिषवौ समौ ॥४६३॥
स्यात् प्रातस्सवनञ् चाऽवगथो माद्ध्यन्दिनन् ततः ।
सवनञ्च तृतीयञ्च सवनञ् चाऽह्निन्न त्रिस् सवाः॥४६४॥
ऋक् सोमसवनीया स्स्यात् स्तरीर् वग्नुस् सवे ध्वनिः ।
यष्टाऽवकाश्श्यो योऽद्ध्येष्ष्यो ग्रहावेक्क्षणमन्त्रणे ॥४६५॥
अथ स्स्तोत्त्रोपाकरणं स्याद् धि स्तोत्त्राय प्रेरणम् ।
स्तोत्त्रन् तत् स्यादृगद्ध्यूढं साम यद् देवतास्स्तुतौ ॥४६६॥
[illegible] स्तोमश् च [illegible] उक्थः [illegible] स्तवः ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

श्लोकः परिष्टुतिर् धीतिस् सुवृक्तिश् च मतिस् स्तुतिः ॥४६७॥
प्रशस्तिस् सुष्टुतिश् शस्तिर् धीरिद् स्तुत् स्तुप् च दोहना ।
नीथा मनीषा वार्कार्या विपण्ण्या दंसना मना ॥४६८॥
धेना जरा च जरणा दुवस्स्यवँ वक्म मन्म च ।
वचो विवचनं सुम्म्नम् प्रवाच्च्यन् च प्प्रवाचनम् ॥४६९॥
स्युर् बहिष्पवमानाज्ज्यपृष्ठ्यादीनि च तद्भिदाः ।
पवमानस्स्तोत्त्रभिन्नस्तोत्त्रन् धुर्यमितीर्यते ॥४७०॥
एकर्चन् च प्प्रगाथश् च स्तोत्त्रियन् चेति गानदिक् ।
स्तोमस्स्तोत्त्रऋचावँव्रातस् त्रिवृत्स्तोमादिकश्च सः ॥४७१॥
अथ ज्ज्योतींषि चत्त्वारस् स्तोमास् स्युस् त्रिवृदादयः ।
स्तोमेषु य ऋगावृत्तिरीतिभेदस् स विष्टुतिः ॥४७२॥
प्रादेशो विष्टुतौ योज्ज्यश् शङ्कुरौदुम्बरः कुशा ।
सामानि गीतयो भेदा गायत्त्रन् च बृहत् तथा ॥४७३॥
रथन्तरन् च वैरूपवँ वैराजं शाक्क्वरन् ततः ।
रैवतं रौरवयँ यौधाजयन् चैवाऽऽमहीयवम् ॥४७४॥
औशनौशनसे वामदेव्व्यन् नौधसमेव च ।
कालेयं संहितन् चाऽपि शफम् पौष्कलमित्त्यपि ॥४७५॥
ततश् च श्यावाश्श्वन् चान्धीगवमाभीशवन् तथा ।
श्यैतन् च वारवन्तीययँ यज्ञायज्ञियमत्त्र तु ॥४७६॥
अग्निष्टोमन् चेति साम्नान् दिङ्मात्त्रमिह दर्शितम् ।
पृष्ठानि बृहदादीनि षट् स्युः पृष्ठ्यस् तु तच्चयः ॥४७७॥
श्यैतनौधसयोर् गानं साम्नोरुपनिमन्त्रणम् ।
अथ प्प्रस्ताव उद्गीथः प्रतीहार उपद्द्रवः ॥४७८॥
निधनम् भक्तयस् साम्नां हिङ्कारादी च कुत्त्र चित् ।
गायकस् स्तोमवाहाश् च स्तुब्भ्वा च जरिता नदः ॥४७९॥
वन्दमानो जोगुवानः कृपमाणो वचोविदः ।
नवमानश् च शिञ्जारः कीस्त-भन्दिष्ठ-रास्पिनाः ॥४८०॥
रेभो जञ्जप्प्यमानश् च कीरिगूर्त्यर्किसूरयः ।
गाथी सुनीथोऽर्चन् कव्व्यन् सपन् जूर्णिश् च मन्दयुः ॥४८१॥
[illegible] स्तुप् कृपण्यू [illegible] च देवयन् ।
गाथानीश् च विपण्ण्युश् च कारुस् स्तोता नदन् कविः ॥४८२॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu Nepal

CC-0. In Public Domain. Digitization by eGangotri

आग्गलागृधश् च गीर्वाहाश् चोपस्स्तुत् तलवस् समाः ।
आङ्गूष्य आङ्गूषार्हस् स्यात् स्यादृगर्हस् तु ऋग्मियः ॥४८३॥
शशमानश् शंसमान उपाकुर्वन्नृचं हि यः ।
शस्त्रमुक्थन् देवतायाश् शंसो होत्र ऋचा कृतः ॥४८४॥
न्यूङ्खा अर्धर्चद्द्वितीयस्स्वरस्थाने हि षोडश ।
ओकारा अधिका वा तद्योजनन् न्यूङ्खनं स्मृतम् ॥४८५॥
स्युर् ऋक्तृतीयपादान्तस्स्वरस्स्थाने निवेशिताः ।
ये हि चत्त्वार ओकारा निनर्द इति ते स्मृताः ॥४८६॥
प्रतिगरश् चाऽनुगरो होतृप्प्रोत्साहनवँ वचः ।
आज्ज्यञ् च प्प्रउगञ् चैव वैश्श्वदेवाऽऽग्निमारुते ॥४८७॥
मरुत्त्वतीयन् निष्केवल्ल्यञ् चेयं शस्त्रभेददिक् ।
दीक्षान्तोऽवभृथश् चेष्टिस् सोमान्तस्स्नानकर्मिका ॥४८८॥
स्यादथोदयनीयेष्टिरिष्टिस् सोमसमापने ।
अनूबन्ध्या वशा मैत्त्रावरुणी गौ॰ प्रकीर्तिता ॥४८९॥
तदन्त इष्टिरुदवसानीयेष्टि॰ प्रकीर्त्यते ।
अग्निष्टोमस् तु प्रथमयज्ञस् सौम्म्याद्ध्वरस् तथा ॥४९०॥
महायज्ञश् शतदुरो धीतिस् स्यात् सप्ततन्तुकः ।
स्यात् पृष्ठशमनीयोऽयज्ञ् कृतस् सत्त्रे समापिते ॥४९१॥
सप्तहोत्त्रास् सोमसँस्थास् स्युर् यज्ञक्क्रतवोऽपि च ।
क्रतवस् तन्तवस् सँस्थास् स्याद् यज्ञ॰ प्राकृतोऽद्ध्वरः ॥४९२॥
उक्थ्यग्ग्रहस्स्तोत्त्रयुतोऽग्निष्टोमो ह्युक्थ्य उच्च्यते ।
षोडशी सोमयागे स्यात् स्तोत्त्रैष् षोडशभिर् युते ॥४९३॥
अतिरात्त्रस् स्मृतो रात्त्रिस्स्तोत्त्रैर् युक्तो हि षोडशी ।
ज्योतिष्टोमस्स्तोत्त्रयुक्त्वाज् ज्योतिष्टोमा इमे स्मृताः॥४९४॥
सोऽस्त्यग्निष्टोम उक्थ्यैर् यो रहितष् षोडशी क्रतुः ।
वाजपेयो वाजपेयस्स्तोत्त्रयुक्तो हि षोडशी ॥४९५॥
अयं सँस्थावाजपेयोऽप्प्यतिरात्त्रे क्रतौ पुनः ।
आप्तोर्यामैर् युते स्तोत्त्रैरप्तोर्याम॰ प्रकीर्तितः॥४९६॥
सर्वस्स्तोमस् सर्वपृष्ठस् स्तोमै॰ पृष्ठैस् समैर् युते ।
सुसूस् सोमं सोतुमिच्छुरीजानो यजमानकः॥४९७॥
सोमा सुन्वन् सुयमानस् सुनस् सुष्विश् च सोमसुः ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

सोता च स्स्यात् सवनकृत् सविता चाऽऽसुतीवल:॥४९८॥
यज्ज्वा तु सोमयाजी स्स्यात् सोमपीथी तु सोमपा: ।
गोपीथस् सोमपीथस् स्याद् वृषपाणन् च तन् मतम् ॥४९९॥
सुतेन्दुस् सोमसुत् सुत्त्वा चितवानग्निमग्निचित् ।
सौमिकोत्तरवेदेस् तु चयनवँ विविधाकृति ॥५००॥
पूर्व्यम् ब्रह्मम्माऽग्निचयनमग्निचित्त्याऽग्निरित्त्यपि ।
सुपर्णचित् कङ्कचिच् च श्येनचिद् रथचक्क्रचित् ॥५०१॥
द्रोणचिच् च प्प्रउगचित् कूर्मचिद् दिगियम् मता ।
समूह्य्यपरिचाय्योपचाय्याश् चित्त्याग्नयः पृथक् ॥५०२॥
पुरुषोऽश्श्वो गौरविश् चाऽजः पञ्चपशवस् स्मृता: ।
पञ्चाङ्गी स्यान् मुखरिका बन्धनी कविकानिभा ॥५०३॥
उखासम्भरणम् मार्त्या उखाया विधिना कृति: ।
महिषी प्रथमा पत्नी धातुस् सयुँयोज्ज्यपिण्डक:॥५०४॥
रास्ना वर्तिस् स्तनाकारावुत्सेधौ हि स्स्तनौ मतौ ।
वर्धनेऽग्नेराचरणन् छर्दनन् त्ववसेचनम् ॥५०५॥
उखायामग्निजननेऽधिश्रित्त्याऽग्नौ प्रवर्जनम् ।
स्तुकासर्गं सृष्टया च मौञ्ज्या रज्ज्वा विनिर्मितौ ॥५०६॥
पिण्डौ हि चिपिटाविण्ड्वे उखाद्द्यादानसाधने ।
शिक्क्यन् तु वेलिकोद्द्यामकृतम् पात्त्रादिधारणम् ॥५०७॥
वनीवाहनमुक्ख्याग्निङ् कृत्त्वाऽनसि हि वाहनम् ।
इष्टकाऽद्भिर् मुक्षितया मृदा यन्त्रोप्तया कृता ॥५०८॥
स्यात् सर्वतस् समतलाऽनेकाश्श्रा श्लक्ष्णपिण्डिका ।
भिदाः पद्द्याप्रभृतयः परिमाणविशेषत:॥५०९॥
अथाऽषाढा यजुष्मत्त्य ऋतव्व्या विश्श्वज्योतिष: ।
लोकम्पृणा वयस्स्याश् च दिश्श्या रेतस्सिचोऽपि च ॥५१०॥
लोगेष्टका बालखिल्ल्या असपत्नाश् च सृष्टय: ।
स्तोमभागा नाकसदश् छन्दस्स्याश् चेति भेददिक् ॥५११॥
परिश्श्रितस् तु परितश् चितिम् मेयाश् शिलेष्टका: ।
सूददोहा मन्त्रभेदे स्याच् च तेनाऽभिमन्त्रणे ॥५१२॥
अनूकोऽग्निक्षेत्त्रमद्ध्यततरज्जुप्प्रदेशक: ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

प्राक्पश्चादायतोऽयम् प्रागनूकः परिकीर्तितः॥५१३॥
तथैवोदगनूकस् स्यात् पक्षमद्ध्यान्तयोस् ततः ।
वेला तु स्वयमातृण्णेष्टकादिस्थानकान्तके ॥५१४॥
समम्बिलेष्टकातुल्यप्रोच्चमद्ध्या कृता चितिः ।
भूर् ज्योतिश् च तथाऽऽयुस् स्यादभिजिद् विश्श्वजित् ततः॥५१५॥
सर्वजिच् चाऽथ साद्द्यस्का व्रात्यस्तोमास् ततः परे ।
वाचस्तोमास् सवास् सर्वस्तोत्रा निखिलशस्त्रकाः॥५१६॥
सोमाः प्रतिकर्मसोमा अग्न्याधेयादिस्थानकाः ।
द्वन्द्वस्तोमा मरुत्स्तोमादिकाश् च गणयज्ञकाः॥५१७॥
श्येनस् साद्द्यस्क्रोऽभिचारे घोरसर्वगुणस् सवः ।
कलापी तृणमुष्टिस् स्यात् साद्द्यस्क्रेषु चषालकः॥५१८॥
सर्वस्स्वारस् स्वमरणकामयष्टुस् सवो मतः ।
स्थपती राष्ट्रपतिना ब्राह्म्मणैश् च पुरस्कृतः॥५१९॥
विप्प्रो बृहस्पतिसवयाजी स्याद् धर्मनायकः ।
अतिरात्त्रास् तथैकाहा नवसप्तदशादयः॥५२०॥
द्व्यहास् त्र्यहाश् चतुरहाः पञ्चाहाष् षडहास् ततः ।
सप्ताहादद्या अहीनास् स्युः पौण्डरीकसर्वान्तकाः॥५२१॥
परियज्ञैः पार्ष्ठिकैर् वा बृहस्पतिसवादिभिः ।
युतो ब्रह्म्मक्षत्त्रसोमो वाजपेयः प्रकीर्तितः ॥५२२॥
स्पर्धया धावनन् चाऽऽजिम् प्रति स्यादाजिधावनम् ।
स्वोरोहणं स्याद् यूपाग्ग्रे रोहणयँ यजमानयोः॥५२३॥
वाजपेयी वाजपेययाजी सम्म्राट् च स स्स्मृतः ।
राजसूयश् च वरुणसवो राज्ञा सताऽऽहृतः॥५२४॥
मासैस् त्रयस्त्रिंशता वैकविंशत्याऽपि वा सवः ।
पवित्त्राद्द्यास् सवा राजसूयसोमाः प्रकीर्तिताः॥५२५॥
सोमार्थः फलचमसो न्यग्ग्रोधस्तिभिनीरसः ।
स्याच् शौनश्शेपमाख्यानं हरिश्चन्द्रकथानकम् ॥५२६॥
देवनन् द्यूतमस्त्र्यक्षवती स्त्री कैतवम् पणः ।
कृतन् त्रेता द्वापरञ् च कलिर् न्युप्ताक्षपर्ययाः ॥५२७॥
त्रैधातवी राजसूयाद्द्यन्तेष्टिः परिकीर्तिता ।
अश्श्वमेधोऽश्श्वपशुकस् सार्वभौमसवश् श्रुतः॥५२८॥
व्यावृत्तिर् विधृतिर् व्युष्टिः क्लृप्तिश् च ब्रह्म्मवर्चसी ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दीर्घ४ पयस्वानूर्जस्वानतिव्याधी प्रभुर् विभुः॥५२९॥
प्रतिष्ठा नाम यज्ञश् चेत्त्यश्श्वमेधस्स्य वाचकाः ।
सोमम् पुरस्कृत्त्य स्वर्गगामी सोमपुरोगवः॥५३०॥
पारिप्लवं स्यादाख्यानमृचान् द्वन्द्वैर् हि यत् कृतम् ।
ग्रहावत्त्र हि सौवर्णराजतौ महिमग्ग्रहौ ॥५३१॥
लाजिस् स्याल् लाजनिकरश् शाचिस् स्यात् सक्तुसञ्चयः ।
पर्यङ्ग्या४ पशवोऽश्श्वाङ्गविशेषेषु नियोजिताः॥५३२॥
छेदनाय कृतास् सूच्च्या रेखा असिपथास् स्मृताः ।
हरिणी सूचिका हैमी ताम्म्री लोहमयी मता ॥५३३॥
अथ वीणागाथिनश् च वीणागणगिन४ पृथक् ।
बाणस् स्यान् महती वीणा काण्डवीणा लघुर् हि सा ॥५३४॥
निगूढार्थस् त्वभिक्क्रोशोऽश्लीलको ह्यभिमेथनम् ।
ब्रह्म्मोद्द्यवदनवँ चाकोवाक्क्ये तत्त्वविवेचनम् ॥५३५॥
अथाऽश्श्वमेधपूतास् स्युर् ब्रह्म्महत्त्यादिकारकाः ।
कृताश्श्वमेधावभृथस्नानपानीयशोधिताः ॥५३६॥
द्वादशाहोऽहीनधर्मा सत्त्रधर्माऽपि वा सवः ।
सत्त्रिणस् सत्त्रमासीना विप्प्रास्सप्तदशावराः ॥५३७॥
स्युश् चतुर्विंशतिपरास् सत्त्रे गृहपति४ पुनः ।
आर्त्विज्ज्यकृद्भिन्नसप्तदशादिर् याजमानकृत् ॥५३८॥
अग्निष्टोमेन चोक्थ्याब्भ्यान् द्वाब्भ्यां षोडशिना पुनः ।
उक्थ्याब्भ्यामेव सहितोऽह्न्नाम् पृष्ठ्यष् षडहो गणः ॥५३९॥
गायत्त्रैस् त्त्रैष्टुभैश् चापि जागतैरक्षरैर् मितैः ।
स्तोमैर् युक्तास् त्रयश् चोक्थ्याश् छन्दोमा४क्क्रतवस् स्मृताः॥५४०॥
अविवाक्क्यमहस् साद्ध्वसाद्ध्ववाच्च्येऽह्न्न्युपान्तके ।
ऐन्द्रवायवशुक्क्राग्ग्रयणग्ग्रहगताग्ग्रताः ॥५४१॥
त्र्यनीका सा समा चेत् स समूढो व्यूढकोऽन्न्यथा ।
सार्वँवासिनं रवो व्यावर्तितयोर् मातृवत्सयोः ॥५४२॥
ब्रह्म्मोद्द्यमत्त्राख्यानं स्यान् निर्गुणस्स्य प्प्रजापतेः ।
सत्त्रोत्थानन् तु सत्त्रर्धिगानादिसहिता क्रिया ॥५४३॥
सन्धिस् स्तोत्त्रभिदा शस्त्रं स्यात् सहस्स्रर्चमाश्शिवनम् ।
स्युस् त्रयोदशरात्त्राद्द्या रात्त्रिसत्त्राण्ण्यहर्गणाः ॥५४४॥
शतातिरात्त्रास् [illegible] प्प्रकीर्तिताः ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

स्याद् गवामयनं सत्त्रम् पूर्णवत्सरसम्मितम् ॥५४५॥
रथन्तर-बृहद्भ्यान् च सामभ्याङ् क्रमशो युतैः ।
षडहोऽग्निष्टोममद्ध्यगोआयुर्भिरभिप्लवः ॥५४६॥
पूर्वस्याऽह्न्नोऽन्तिमस् स्तोमः प्रथमस् स्यात् परेऽहनि ।
यत्त्राऽयमह्न्नां षण्णान् चाऽभ्यासङ्ग्यष् षडहो गणः ॥५४७॥
ज्योतिर् गौरायुरेतानि स्युरहानि त्रिकद्द्रुकाः ।
क्रतवस् स्वरसामानस् त्रयस् स्युष् षष्ठमासगाः ॥५४८॥
विषुवान् सौर्यपशुकोऽग्निष्टोमः पक्षमद्ध्यगः ।
विषुवन्तन् तूभयतष् षण्मास्यौ पक्षकौ स्मृतौ ॥५४९॥
धर्मैस् समैथुनैर् युक्तेऽत्त्रोपान्त्येऽह्न्नि महाव्व्रतम् ।
विशाखी स्यात् कर्णिकायुक् स्थूणा चर्मावलम्बिनी ॥५५०॥
चर्माच्छन्ने भूमिगर्ते वाद्द्ये स्याद् भूमिदुन्दुभिः ॥
वालधानम् पुच्छदण्डे भूमिदुन्दुभिवादने ॥५५१॥
विकर्षणवँ व्यायमनम् पर्यायः परितो गतिः ।
सस्त्रीक-सत्त्रि-सशिखलोमोप्तिस् सत्त्रिमुण्डनम् ॥५५२॥
आदित्त्यानामङ्गिरसान् दृतिवातवतोः पृथक् ।
अयनङ् कुण्डपायिनामयनं सर्पसत्त्रकम् ॥५५३॥
महातापश्चितन् तापश्चितन् तत् क्षुल्लकात् परम् ।
महासत्त्राणि च प्रजापतिसत्त्रादिकानि च ॥५५४॥
प्रभासकार्यदीक्षाणि यात्सत्त्राणि च त्रीण्यपि ।
स्युस् सारस्वतसत्त्राणि तुर्यन् दार्षद्वतन् च तत् ॥५५५॥
ततस् तुरायणं सत्त्रमितीयं सत्त्रभेददिक् ।
बृसी सत्त्र्याद्द्यासनं स्यात् कुण्डं स्याच् चमसीऽत्सरुः॥५५६॥
वाजेद्ध्या यज्ञ्नदीप्तिस् स्यात् स्याद् यज्ञ्नप्प्रसरस् सरः ।
अपित्त्वम् मेध उद्धारो यज्ञ्नभागिन्त्यपित्त्विनी ॥५५७॥
बहिष्कारेऽन्तर्गमनङ् कर्मणिस् स्यात् पुनःकृतिः ।
मृष्टस् सुपाचको हव्व्यपाचको हव्व्यसूदनः ॥५५८॥
सुरामाणस् सुरावन्तो हविष्मन्तो हविर्युताः ।
भूतो गतश्श्रीश् श्रीमान् स पौण्ण्यो यः पुण्ण्यमर्हति ॥५५९॥
यज्ञ्नार्हयँ यज्ञ्नियँयँ यज्ञ्नावशिष्टेऽन्नेऽमृतं स्मृतम् ।
स्यादनुष्ठानकल्पो हि काम्म्यानुष्ठानपद्धतिः ॥५६०॥
उपयाचितकम् पूजा प्रतिज्ञ्नाताऽर्थसम्पदि ।
इष्टापूर्ते इष्टमिज्ज्या पूर्तङ् खातादिकर्म यत् ॥५६१॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

दत्तम् बहिर्वेदि दानम् महादानादिका भिदाः ।
दानवँ विहापितन् त्याग उत्सर्जन-विसर्जने ॥५६२॥
विश्श्राणनवँ वितरणं स्पर्शनम् प्रतिपादनम् ।
प्रादेशनन् निर्वपणमपवर्जनमंहतिः ॥५६३॥
सातिस् सन्तिर् दातिदत्ती रातिश् च प्प्रयतिस् सतिः ।
शिक्क्षा च मंहना तुञ्जश् चाऽतिसर्गश् च दावनम् ॥५६४॥
उपयोगो धर्मकार्ये स्यादर्थविनियोजनम् ।
इष्टी पूर्ती चाऽथ दात्त्रो दामा दावा ददिस् सनिः ॥५६५॥
दाता देवश् च मंहिष्ठस् सन्त्यश् च ददिता ददः ।
देष्णुर् दानुश् च तरुता शाकी च दाशुरित्त्यपि ॥५६६॥
रातिस् सुदत्त्रस् सुदानुः पुरुदस्मो बहुप्प्रदः ।
स्वर्षा वराहूश् चोदारो जीरदानुस् तु क्षिप्प्रदः ॥५६७॥
सत्त्रादावन् सदादाता वाजसा अन्नदस् स्मृतः ।
ददानो ददमानो रन् दन् दशस्स्यन् ददत् समाः ॥५६८॥
दाश्श्वान् दास्स्वाँश् च ददिवान् दत्त्वाँश् च ररिवानपि ।
शिक्क्षानरो दाननेता दानेशो दानुनस्पतिः ॥५६९॥
दातुः प्रतिग्ग्रहीतृब्भ्यः प्रार्थनाऽद्ध्येषणा सनिः ।
निमन्त्रणाऽऽमन्त्रणे द्द्वे पृथक् केतनभेदके ॥५७०॥
व्रतन् तु नियमस् स्यात् तच् चोपवासादिपुण्ण्यकम् ।
वसन्तपञ्चमी-रामनवम्म्यादिव्व्रतानि दिक् ॥५७१॥
उपवासस् त्वौपवस्तन् निराहारोऽप्प्यनाशकः ।
सन्न्यासवत्त्यनशने प्रायः प्रायोपवेशनम् ॥५७२॥
प्रभवन्नुपवासाय नरस् स्यादौपवासिकः ।
स्यादनाश्श्वाननशितस् तथाऽभुक्त उपोषितः ॥५७३॥
अनाशकी चापि प्रतिशयितश् चोपवास्स्यपि ।
धर्मो वेदेषु विहितस् सूचितोऽप्प्यर्थ उच्च्यते ॥५७४॥
धर्मञ् च धर्म सुकृतम् पुण्ण्यं श्श्रेय ऋतवँ वृषः ।
भगश्च भागधेयञ् चाऽदृष्टं स्यात् पुण्ण्यपापयोः ॥५७५॥
पापम् पाप्मा पुमान् पङ्कोऽस्त्र्यघङ् किल्बिषमंहतिः।
मृत् कल्मषञ् च कलुषं रपो रिप्प्रञ् च कल्मलम् ॥५७६॥
एन एहश् च वृजिनमहो दुरितदुष्कृतम् ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

वरुण्ण्यम् प्रत्त्यवायोंऽहु॰ कल्क॰ कण्ण्वञ् च पातकम् ॥५७७॥
ब्रह्म्महत्त्या सुरापानम् ब्राह्म्मणस्स्वर्णचोरणम् ।
गुरुदाराभिगमनमेतद्युक्तेन सङ्गतिः ॥५७८॥
स्युर् महापातकान्न्युपपातकादीनि चाऽत्त्र दिक् ।
साधुकृत्त्या-पापकृत्त्या-सम्भेद॰ पापवस्स्यसम् ॥५७९॥
क्षिया धर्म्मात्त्ययो यज्ज्ञनाशनयँ यज्ज्ञवेशसम् ।
उपपात॰ कर्म्मनाशो भ्रेषश् चाऽप्प्ययथाकृतिः ॥५८०॥
पापी तु पातकी प्रायश्चित्तीय॰ प्रत्त्यवाय्यपि ।
एनस्स्व्यंहुर् देवपीयु॰ पाप आधर्म्मिकोऽपि च ॥५८१॥
नास्ति वेदैश् श्रेय इति मतिर् यस्स्य स नास्तिकः ।
अघायवो वधरता अभिशस्ता विगीतकाः ॥५८२॥
प्रायश्चित्तवँ व्रतम् प्रायश्चित्तिर् निर्वेष(श)इत्त्यपि ।
कृच्छ्र॰ प्राजापत्त्यकाये अतिकृच्छ्रादिका भिदाः ॥५८३॥
चान्द्रायणङ् ग्रासवृद्धि-ह्रासौ चन्द्रानुगौ व्रते ।
पञ्चगव्व्यङ् कुशापो गोर् मूत्त्राज्ज्ये विट् पयो दधि ॥५८४॥
ब्रह्म्मकूर्चस् सान्तपनम् महासान्तपनञ् च दिक् ।
पराकस् तु निराहारो द्वादशाहो जपादियुक् ॥५८५॥
अलङ्कर्म्मीणक॰ प्रत्त्याम्म्नाय॰ प्रतिनिधि॰ प्रतिः ।
चीर्ण्व्व्रत॰ कृतव्रतो व्रतवान् संशितव्व्रतः ॥५८६॥
श्रद्धाकरस् स्याच् श्रद्धालुश् श्रद्धादेवश् च धार्मिकः ।
अस्ति वेदैश् श्रेय इति मतिर् यस्स्य स आस्तिकः ॥५८७॥
नियुक्तोपस्थितोत्सृष्टपुरुषै॰ पशुभिर् युतः ।
सोम॰ पुरुषमेधस् स्यात् प्राजापत्त्येष्टिरित्त्यपि ॥५८८॥
सर्वमेधस् सर्वहोमयुक् सोमो दशरात्त्रकः ।
सर्ववेदास् स येनेष्टो यागस् सर्वस्स्वदक्षिणः ॥५८९॥
वनेवासस् तु श्मश्श्रूणि वानप्प्रस्थाश्श्रमोऽपि च ।
वानप्प्रस्थो वनेवासी धातुरक्तश् च तापसः ॥५९०॥
वनस्स्थश्श्रमणारण्ण्याश्श्रमा वैखानसो वनी ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ब्रह्म्मवैखानसो वानप्प्रस्थे ब्रह्म्मानुयायिनि ॥५९१॥
भिदा॰ पचमानकाद्या व्रतवँ वैखानसव्व्रतम् ।
अग्नयस् स्युश् श्रावणका आहिताश् श्रवणागमात् ॥५९२॥
अभिषिक्त॰ कृतस्स्नान॰ प्रतीक्षाऽतिथिसत्क्रिया ।
उपासना तु स्स्याद् ध्येयार्थैकप्प्रत्त्ययसन्ततिः ॥५९३॥
स्वयवँविशीर्णम् प्रवृत्तवँ वैष्कं हिंस्रहतामिषम् ।
उञ्छ॰ कणश आदानङ् कणिशाद्द्यर्जनं शिलम् ॥५९४॥
यष्टिर् मीनाऽथ काजं स्यात् खनित्त्री च विशाखिका ।
तपस्स्वी तापस॰ पारिकाङ्क्षी वाचयँयमो मुनिः ॥५९५॥
स्यात् स्थाण्डिलस् स्थण्डिलशो व्रती स्थण्डिलशाय्यपि ।
तैजसश् शुद्धसत्त्वो द्वयातिगो विरजस्तमाः ॥५९६॥
अकामहत-निष्कामौ निश्शास् स्याच् शान्तकामनः ।
दान्तस् तपःक्लेशसहश् शान्तस् तूपशमान्न्वितः ॥५९७॥
यतिनो यतयस् ते ये निर्जितेन्द्रियग्रामकाः ।
महाप्रस्थानमामृत्त्योर् यानम् प्रत्त्युत्तरान् दिशम् ॥५९८॥
मुमूर्षुस् त्वचिरेणैव मरिष्ष्यन् दुर्बलोऽपि सः ।
दशदानानि दानानि गोभूमितिलरुक्मणाम् ॥५९९॥
आज्ज्यवासोधान्न्यगुडरौप्प्याणालँ लवणस्स्य च ।
धेनुर् वैतरणी देया तर्तुवँ वैतरणीन् नदीम् ॥६००॥
उत्क्रान्तिधेनुस् सा धेनुर् देया सूत्क्रमणाय या ।
मुमूर्षुजप आरण्ण्यकादे॰ पाठो यथाविधि ॥६०१॥
शवनिर्हारिभिर् जप्प्यं सूक्तं स्याद् यमसूक्तकम् ।
यमगाथा तु सा गाथा या गेया शववाहने ॥६०२॥
सन्तापाग्निर् वह्न्निरुक्थ्यश् शवदाहाय साधितः ।
क्रव्व्यादाग्निश् चाऽथ मृतपुत्त्राद्या अनुभाविनः ॥६०३॥
शवनिर्हरणी खट्ट्वाऽपदोदुम्बरकाष्ठजा ।
अघखट्टिस् सैव खाट॰ कट॰ खाटा च खाटिका ॥६०४॥
शवानोऽघरथश् चाऽघरथी शवरथोऽपि च ।
कायत्त्रकन् चाऽघवस्त्रम् प्रथमम् प्रेतवस्त्रकम् ॥६०५॥
स्याद् भूमिजोषणङ् कृत्त्ये प्रकृते भूमिसाधनम् ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

श्मशानं स्यात् पितृवनञ् चिता चित्त्या चितिस् स्त्रियाम् ।
स्यादनुस्तरणी वृद्धा गौर् वाऽजाऽऽदहने पशुः ।
शवसँस्कारश् शवस्य दाहो निखननादि वा ॥६०७॥
अपस्नानं स्यादुदकदानायाप्सु निमज्जनम् ।
प्रेतायोदकदानं स्यात् प्रसेको हि जलाञ्जलेः ॥६०८॥
और्ध्वदैहिकमन्त्येष्टिᳶ प्रेतकर्मोदकक्रिया ।
शोकापवदनं सर्वसंसारानित्त्यताकथा ॥६०९॥
रीतीभूताᳶ पङ्क्तिबद्धा आशौचेऽशौचमित्त्यपि ।
अन्त्येष्टिकारिणश् शय्याकटस् स्यादघप्रस्तरः ॥६१०॥
पितृदानन् निवपनन् निवापश् च पुमानयम् ।
श्राद्धम् प्रमीतमुद्दिश्श्याऽन्नस्य त्यागो यथाविधि॥६११॥
उत्क्रान्तिश्राद्धमित्त्याद्द्या अस्य भेदाᳶ प्रकीर्तिताः ।
प्रेतश्श्राद्धन् तु प्रेतत्त्वमुक्तेᳶ प्राक् श्राद्धकर्म यत्॥६१२॥
अस्थिसञ्चयनवँ वैतानिकास्त्थ्नां सञ्चयो घटे ।
दशाहिकश्श्राद्धमङ्गपूरणश्श्राद्धमित्त्यपि ॥६१३॥
पाथेयश्राद्धन् तत् प्रेतलोकादेᳶ पथि साधु यत् ।
नवश्श्राद्धञ् च विषमश्श्राद्धं श्राद्धमयुग्दिने ॥६१४॥
एकादशाहिकं श्राद्धम् प्रदानन् नावमित्त्यपि ।
नैमित्तिकश्श्राद्धमेकोद्दिष्टश्श्राद्धम् प्रकीर्तितम् ॥६१५॥
सपिण्डीकरणम् पितृपङ्क्तौ प्रेतस्य योजनम् ।
शुद्धशान्तिस् तु शान्तिस् स्यान् मृत्त्युभीतिविनाशिनी॥६१६॥
मासादौ मासिकं श्राद्धम् पूर्णे त्वब्दे तदाब्दिकम् ।
सान्नोदकुम्भदानयँ यद् दानमब्दञ् च प्रत्त्यहम् ॥६१७॥
अशौचे वार्षिकाशौचम् महागुरुनिपातजे ।
क्षयाहश्श्राद्धमब्देऽब्दे श्राद्धम् मृत्त्युतिथौ हि यत् ॥६१८॥
विधिना तत् पार्वणवँ वैकोद्दिष्टवँ वैकपार्वणम् ।
नान्दीमुखाब्भ्युदयिकश्श्राद्धे द्वे वृद्धिश्राद्धके ॥६१९॥
स्युर् महालयश्राद्धाद्द्याश् श्राद्धभेदाᳶ परेऽपि च ।
श्राद्धाधिकारी तु योग्यᳵ कर्ता श्राद्धस्य शास्त्रतः ॥६२०॥
पङ्क्तेस् संशोधका मन्त्राद्ध्याय्याद्द्याᳶ पङ्क्तिपावनाः ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

द्विर्नग्नो वेदाग्निहीनोऽथवा दुश्चर्मको मतः ॥६२१॥
विद्धप्प्रजननो यस्स्य विद्धम् प्रसवयन्त्रकम् ।
पितरो देवपितरो मनुष्यपितरो द्वयाः ॥६२२॥
परा नान्दीमुखाः प्रोक्तास् ते च सोमसदादयः ।
मद्ध्यमाः पार्वणास् ते च श्श्रुत्त्युक्तास्सोमपादयः ॥६२३॥
अवराः प्रेतपितरो मनुष्यपितरश् च ते ।
त्रयः पित्त्रादयो ह्यश्श्रुमुखा नान्दीमुखाः परे ॥६२४॥
य आरोपितपितृत्त्वस् स पितृब्ब्राह्म्मणस् तथा ।
वैश्श्वदेवब्ब्राह्म्मणश् च होमेऽग्नौकरणम् मतम् ॥६२५॥
मोटको द्विगुणो दर्भो गन्धस् स्यादनुलेपनम् ।
अवनेनिजते येन जलन् तदवनेजनम् ॥६२६॥
कुशास् स्वधावाचनीयास् साग्ग्राश् च सपवित्त्रकाः ।
विप्प्रप्प्रतिनिधिर् दर्भवटुः कुशवटुश् चटः ॥६२७॥
तृप्तिः क्षुत्प्रशमो मासिकादिर् द्रव्व्यविशेषतः ।
अक्क्षय्यतृप्तिः खड्ग्यादिमांसाद्द्यैश् शाश्श्वती हि सा ॥६२८॥
पितृमेधोऽग्न्याहितस्स्याऽस्थिकुम्भोद्धरणादिकम् ।
ब्रह्म्ममेधश् श्श्रोत्त्रियस्स्याऽऽचार्यस्स्य यदि कर्म तत्॥६२९॥
विफल्फान्नमहस् तत्त्राऽस्थिकुम्भोद्धरणेऽहनि ।
कक्क्षस् तु गहनो देशोऽवतापी तु स सातपः॥६३०॥
शर्वँवान् सुखकरः कर्वँवान् कमनीयतमो मतः।
कर्षूस् स्त्री पुंसि कोषारः कुल्ल्याका पितृकार्यजा ॥६३१॥
वंशबद्धा समुद्धार्या तृणमुष्टिर् हि तेजनी ।
अस्थिकुम्भस्स्याऽऽक्क्षणवनम् प्रक्क्षेपेण प्प्रभेदनम् ॥६३२॥
एडूकमन्तर्न्यस्तास्थि कुड्ड्यं हि चितिचिह्न्नकम् ।
बाहुश्श्रुत्त्यन् तपस् त्यागश् श्रद्धा यज्ञक्क्रिया क्षमा ॥६३३।
भावशुद्धिर् दया सत्त्यं सय्यँमश् चाऽऽत्मसम्पदः।
दया क्क्षमाऽनसूया च शौचमायासवर्जनम् ॥६३४॥
सदाचारोऽकृपणताऽस्पृहा चाऽऽत्मगुणास् स्मृताः ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

तदर्थङ्कर्म सँस्कारो निषेकादि यथाविधि ॥६३५॥
गतिꣳ कर्मविपाकश् च शास्त्रप्प्रोक्ते क्रियाफले ।
विवेको नित्त्यताऽनित्त्यतादिभेदस्स्य दर्शनम् ॥६३६॥
स्याद् विरागश् च वैराग्ग्यमनासक्तिरसज्जनम् ।
शमश् चेतस्सयँयमस् स्याद् दमस् त्विन्द्रियनिग्ग्रहः॥६३७॥
तितिक्क्षुर् द्वन्द्वसहितोपरस् तूपरतो मतः॥
चित्तैकाग्ग्र्यं समाधानं श्रद्धा विश्श्वसनं श्रुतौ ॥६३८॥
मुमुक्क्षा मोक्तुमिच्छा संसारबन्धनसन्ततेः।
सन्न्यास उत्थानम् मौनम् प्रव्व्रज्ज्या पारिव्राज्ज्यकम्६३९
परमाश्श्रम-कैवल्ल्याश्श्रम-ब्रह्माश्श्रमास् तथा ।
स्युरुत्तमाश्श्रम-क्क्षेमाश्श्रम-तुर्याश्श्रमा अपि ॥६४०॥
विद्व्त्सन्न्यासश् च विविदिषुसन्न्यास इत्त्यपि ।
स स्स्यादातुरसन्न्यासो विना श्राद्धादिकन् तथा ॥६४१॥
विनैव विरजाहोममातुरेण हृदा कृतः ।
सन्न्यासी मस्करी पाराशरी कर्मन्धनाशकी ॥६४२॥
परिव्व्राद् स्यात् प्रव्व्रजितꣳ प्रव्व्राजी भिक्क्षुको यतिः ।
परिव्व्राजक उद्घातो व्युत्थितꣳ परतापसः ॥६४३॥
कुटीचरो बहूदको हंसꣳ परमहंसकः ।
त्रिदण्डी चैकदण्डी च निर्दण्डो न्यस्तदण्डकः ॥६४४॥
अत्त्याश्श्रमी स्यात् तुरीयातीतो वाऽप्प्यवधूतकः ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अवधूतो ब्रह्मसँस्थो धूतसंसारबन्धनः ॥६४५॥
साधुस् सिद्ध्रश् च सुम्नश् च स्याद् वातरसनोऽद्द्वयाः ।
सन्तो ब्रह्मपरा भूतावसक्तास् स्युर् महाजनाः ॥६४६॥
सिद्धस् सुभूतो युक्तश् च योगी युञ्जानसाधकौ ।
व्रज्ज्याऽटाट्ट्या पर्यटनमल्पन् तत् स्याद्गतागतम् ॥६४७॥
भिक्षाको भिक्षको नैकटिकस् स्यान् निकटे वसन् ।
याच्ञा च याचनैष्टिश् चाऽभिशस्तिश्च प्रार्थनाऽर्थना ॥६४८॥
कुहना स्यात् स्त्रियालँ लोभान् मिथ्येर्यापथकल्पना ।
इर्यापथस्स्थितौ चर्या पतनवँ वेदतश् च्युतौ ॥६४९॥
बहिष्कारस् त्वनुदकीकरणम् पतितस्स्य यत् ।
धर्मद्ध्वजी लिङ्गवृत्तिर् दाण्डाजिनिकदाम्भिकौ ॥६५०॥
धर्माभासोपजीवी च धर्मवैतंसिकोऽपि च ।
स्युश्च पाखण्डाश्च पाषण्डा वेदबाह्य्या हि लिङ्गिनः ॥६५१॥
चार्वाको जीवको लौकायतिकश्च कुण्डकीटकः ।
वैशेषिकस् स्यादौलूक्क्य आक्षपादस् तु तार्किकः ॥६५२॥
साङ्ख्यस् तु कापिलोऽथ स्स्याद् योगी हैरण्ण्यगर्भकः ।
वैष्णवो वैखानसश् च एकान्त्येकायनी तथा ॥६५३॥
चातुर्व्यूहो भागवतस् सात्त्वतश्च पाञ्चरात्त्रिकः ।
शिवभागवतश् शैवो भस्मस्स्नायी हरद्द्विजः ॥६५४॥
कौलश्च कापालिकश्च पाशुपतो लाकुल लाकुलौ ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

अघोरो भैरवो कालामुखो जङ्गमकश् च दिक् ॥६५५॥
शक्त्युपासनसाद्ध्येष्टसिद्धिकश् शाक्त उच्च्यते ।
सौरस् सूर्योपासकस् स्याद् गाणपत्त्यो गणेशभाक् ॥६५६॥
कौमारस् तु कुमारस्स्योपासकः परिकीर्तितः ।
षट्सिद्धान्ता वैष्णवादितन्त्रमार्गाः प्रकीर्तिताः ॥६५७॥
जैनो नग्नः क्षपणकस् स्यात्स्याद्वादिक आर्हतः ।
निर्ग्रन्थो जीवको नग्नाटको लुञ्चितकेशकः ॥६५८॥
बौद्धो भदन्तो जैनश् च शून्न्यवादी च सौगतः ।
तद्भेदा हीनयान्न्याद्यास् तथा माद्ध्यमिकादिकाः ॥६५९॥
उत्थानायौपनिषदकर्म सन्न्यासिकृत्त्यकम् ।
शरीरसाधनापेक्क्षन् नित्त्ययँ यत् कर्म तद् यमः ॥६६०॥
अहिंसा सत्त्यमस्स्तेयम् ब्रह्म्मचर्यमसङ्ग्रहः ।
नियमस् तु स यत् कर्म नित्त्यमागन्तुसाधनम् ॥६६१॥
शौचं सन्तोषस् तपश् च स्वाद्ध्यायो ब्रह्म्मचिन्तनम् ।
ध्यानयोगासने ब्रह्म्मासनम् पद्मासनादिकम् ॥६६२॥
प्रत्त्याहारस् त्विन्द्रियाणावँ विषयेब्भ्यस् समाहृतिः ।
श्रवणन् त्वनुसन्धानमात्मनश् श्रुतिवाक्क्यतः ॥६६३॥
महावाक्क्यमखण्डार्थवँ वाक्क्यम् ब्रह्म्मात्मबोधकम् ।
मननन् तु महावाक्क्यार्थस्स्य युक्त्या विचारणम् ॥६६४॥
धारणा तु भवेद् ध्येये चित्तस्स्य सुस्थिरबन्धनम् ।

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

ध्यानन् निदिद्ध्यासनम् प्रसङ्ख्यानञ् चैकतानता ॥६६५॥
समाधिर् ना तदेवार्थमात्त्राभासनरूपकम् ।
सयँ्यमस् त्त्रयमेकत्त्र प्प्रयुक्तन् धारणादिकम् ॥६६६॥
पवित्त्रः प्प्रयतः पूतस् सलिलश् चोक्क्ष इत्त्यपि ।
असंसर्ग्गयर्थावगाही तत्त्वमस्स्यादिवाक्क्यजः ॥६६७॥
अहम्ब्रह्म्माऽस्स्मीति बोधो ह्यखण्डज्ज्ञानमुच्च्यते ।
स्याद् ब्रह्म्मभूयम् ब्रह्म्मतत्त्वम् ब्रह्म्मसायुज्ज्यमित्त्यपि॥
देवभूयञ् च देवत्त्वन् देवसायुज्ज्यकादि दिक् ।
मुक्तिस् सम्पत्तिश्च मोक्क्षोऽपवर्गश् चाऽपुनर्भवः॥
निश्श्रेयसञ् चाऽमृतत्त्वङ् कैवल्ल्यश्श्रेयसी अपि ।
धर्माऽर्थकाममोक्क्षास् स्युः पुरुषार्थाः पुमर्थकाः ॥
त्रिभिराद्द्यैस् त्रिवर्गस् तैश् चतुर्वर्गस् समोक्क्षकैः।
सबलैस् तैश् चतुर्भद्द्रमर्थः कृत्त्यम् प्प्रयोजनम्॥६७१॥

इत्त्याचार्यकौण्डिन्न्यायनकृते वेदभाषानिघण्टौ
भूलोककाण्डे ब्रह्म्मवर्गस् समाप्तः॥२॥

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

शब्दानुक्रमणिका

(शब्दस्याऽग्रेऽव्यवहिततया वर्तमाना अङ्का ब्रह्मवर्गश्लोकसङ्ख्याम् बोधयन्ति । दे=देववर्गश्लोकसङ्ख्या । म=मङ्गलपाठश्लोकसङ्ख्या । शब्दात् प्राग् वर्तमानएकोबिन्दुर् वैजयन्त्यान् तस्य शब्दस्य सत्ताम् बोधयति, द्वितीयश्चाऽमरकोषेऽपि तस्य शब्दस्य सत्ताम् प्रतिपादयति। •-=अमरकोषेएव)

अंशुमत्प्रभृतय: ४१८
अंसौ २६४
••अंह: ५७७
•• अंहति: ५६३, ५७६
अंहु: ५७७, ५८१
अकामहत: ५९७
अक्क: दे ९
अक्षमाला १५
अक्षय्यतृप्ति: ६२८
••अक्षरम् म ५
•• अक्षवती ५२७
•• अक्षा: दे २०
• अक्षितम् म २
अक्षिति: म ९
अक्ष्णया २७५
अखण्डज्ञानम् ६६८
•अगस्तय: १२
•अगस्ति: १९
••अगस्त्य: १९
••अग्रजन्मा ३२
•अग्रदिधिषू: १७०
अग्रेदघु: १७०
•• अग्रेदिधिषू: १७०
•• अग्नायी दे १८, २६
•• अग्नि: म ४, दे१,
अग्नि: ५०१
अग्निकर्म १११
अग्निकुण्डम् २६३
अग्निगृहम् २६२
अग्निचयनम् ५०१
•• अग्निचित् ५००
अग्निचित्या ५०१
अग्निपत्नी दे १८, ३०४
अग्निमन्थन-यन्त्रकम् २५६
अग्निमिन्धक: २२५
अग्निमुपशायी ३१४
• अग्निष्टोम: ४९०
अग्निष्टोमम् ४७७
• अग्निष्ठ: ३८५
• अग्निष्ठम् [illegible]
• अग्निहोत्त्रम् ३१६
अग्निहोत्रशाला २६२
•अग्निहोत्रहवणी २८०
अग्निहोत्रहुत् ३२४
अग्निहोत्रहोमी ३२४
अग्निहोत्रायणी ३७३
•अग्निहोत्री ३१६, ३२४
अग्नीत् २२५
अग्नीषोमीय:४००
अग्नीषोम्म्य:४००
अग्नौकरणम् ६२५
•अग्न्याधानम् २२१
अग्न्याधानादिसम्भारा:२५८
अग्न्याधेयम् २२१
• अग्न्याहित: ३१५
अघखट्टि: ६०४
अघप्रस्तर: ६१०
•• अघम् ५७६
अघमर्षणम् १२४
अघरय: ६०५
अघरथी ६०५
अघवस्त्रम् ६०५
• अघायव: ५८२
अघोर: ६५५
अङ्गजित् ६१
अङ्गपूरणश्राद्धम् ६१३
अङ्गराग: १४०
••अङ्गार: दे १६
अङ्गालम्भनम् ११२
अङ्गिरस: ९
अङ्गिरसामयनम् ५५३
अङ्गिरस्तम: ११
अङ्गिरा: दे६
••अच्युत: म१३
अच्छावाक: २२७
••अज: म९
अजएकपात् ४४०
• अजितनेमि: १०८
••अजिनम् १०३, १५०
•• अञ्जनम् १४३
•• अटाट्ट्या ६४७
अणुक: ४८
•अतिकृच्छ्रादिका: ५८३
[illegible] ११०, ४१७
•• अतिपात: ८१
अतिप्प्रणीत: ३९२
अतिरात्र: ४९४
अतिरात्रा: ५२०
अतिव्याधी ५२९
अतिसर्ग: ५६४
अत्यग्निष्टोम: ४९५
अत्याश्रमी ६४५
अत्त्रय: १२
•-अत्रि: १४
अथर्य: ३०२
अथर्यु: ३०२
अथर्वा ५०
••अदृष्टम् ५७५
अद्धातय: ४३
•अद्ध्ययनम् १९६
अद्ध्यापक: ७१
•अद्ध्यापनम् १९६
अद्ध्यायक: ७२
अद्ध्यूहनम् ३५०
••अद्ध्येषणा ५७०
अद्ध्रिगु: २३४
••अद्ध्वर: २४५
अद्ध्वर: २५१,४९२
•• अद्ध्वर्यु: ४९, २२५
अद्ध्वर्युसदनम् २७०
अधरारणि: २५१
अधश्रयणम् ९५
• अधिपति: म१२
अधिश्रयणम् ९४
अनद्धापुरुष: १५१
अनद्ध्याय: २०६
अननूक्ति: १३२
••अनन्तम् म १
•• अनल: दे३
अनवानन् ३४६
अनशित: ५७३
अनशनतसाङ्गमन:३०५
• अनाशक: ५७२
• अनाशकी ५७४,६४२
अनाश्श्वान् ५७३
अनासक्ति: ६३७
अनिराकरणम् १८५
• [illegible] ७९
•• अनुक्रम: ८०
अनुगति: २९८
अनुगमनम् २९८
अनुगर: ४८७
अनुच्छ्वसन् ३४६
अनुज्ञा ३४३
अनुज्ञाप्रार्थनम् ३४३
अनुदेशनम् ४४७
अनुद्द्रवणम् १९७
•• अनुपदीना १४५
•अनुपात्यय: ८०
अनुभाविन: ६०३
अनुयुक्त: ७७
अनुयोक्ता ७७
•-अनुलेपनम् १४०
अनुवषट्कार: ३५५
अनुवाक्या ३५१
अनुवाचनम् १११
अनुशिष्ट: ४२
अनुष्ठानकल्प: ५६०
अनुस्तरणी ६०७
अनूक: ५१३
•-अनूकम् २७
•• अनूचान: १४८
अनूबन्ध्या ४८९
अनूयाजा: ३६०
•• अन्त: ३६५
अन्त:पात्य: ४३८
अन्तर्गमनम् ५५८
अन्तर्धानकट: २९१
अन्तर्यामादिका: ४५२
अन्तर्यामी म ४
•• अन्तरिक्षम् म २
•• अन्तेवासी २०१
अन्त्येष्टि: ६०९
अन्नप्राशनम् २१८
•• अन्वय: २७
•• अन्ववाय: २८
अन्वष्टका २१०
अन्वाधानम् ३२९
अन्वारम्भणम् २९९
अन्वारम्भणीया ३२६
अन्वालम्भनम् २९९

Prof. Amodavardhana Kaundinnyayana Collection, Kathmandu, Nepal

CC-0. In Public Domain. Digitization by eGangotri

• अन्वाहार्यः ३३८
•अन्वाहार्यपचनः ३०२
•• अन्वाहार्यम् १८३
•• अपक्रमः ८१
•• अपचितिः १३१
•• अपदेशः ४२२
अपनोद्यः १९२
•• अपवर्गः ३६५, ६६९
•• अपवर्जनम् ५६३
अपवर्तिका ४२३
अपसलवि १०३
अपसलै १०३
•• अपसव्यम् १०२
• अपस्नानम् ६०८
अपाम्प्रणयनम् ८६
अपिजः म ११
अपित्वम् ५५७
अपित्विनी ५५७
अपिव्रताः ४२६
• अपुनर्भवः ६६९
अपोनप्त्रीयादयः ४०१
अप्तुः ४१७
अप्तोर्यामः ४९९
•• अप्पित्तम् दे ५
अप्प्वा दे २४
अप्सुदीक्षा ४२२
अप्सुषत् दे १०
अभ्यागतः १९१
•• अभ्यागारिकः १७२
• अभ्यासः २७६
अभ्यासङ्गयः ५४७
अभ्युक्षणम् ८४
• अभ्युत्थानम् १३२
•– अभ्युदितः १३४
अभ्युन्दनम् ९७
अभ्यूहनम् ३३६
•• अभ्रिः २९०
अभक्ष्यम् १९५
अभिगरः ३५
अभिगूर्तम् ३५३
अभिघारणम् ३४२
•• अभिजनः २८
अभिजित् ५१५
अभिधानी ४३५
अभिनिधानम् ३३०
अभिनिम्मुक्तः १३४
अभिपित्वम् २५०
अभिप्लवः ५४६
अभिसेचनम् ५३५
• अभियुक्तः ४६
•• अभिवादनम् ११३
•• अभिशस्ताः २८५
•• अभिशस्तिः ६४८
•• अभिषवः ४६१
अभिषवणम् ४६०
• अभिषिक्तः ५९३
अभिषूतिः ४६१
• अभिषेकः १२२
अभिष्ठानम् ३९३
अभीशवः दे २१
अभुक्तः ५७३
अमुष्यपुत्रः ३०
अमूत्रकृतम् ४२३
• अमृतः ४१६
• अमृतत्वम् ६७०
•• अमृतम् म१, ५६०
•• अम्बरम् म२
अयनम् ७९
अयनसत्त्राणि ५४५
अयाचितः २३
•• अरणिः २५१
अरण्यपत्नी दे२३
अरिः २४२
अरुणदूर्वाः ४२०
अरुन्धती १५
अरुषः दे ९
•• अर्कः दे ६, ४६७
अर्किः ४८१
•• अर्घः १५९
•• अर्घ्यम् १९३
अर्चन् ४८१
•• अर्चिः दे १४
अर्चिःप्रत्यवायः ३२०
अर्णवः म ६
•• अर्थः ६७१
•• अर्थना ६४८
अर्हणा १३१
•• अलङ्कर्मीणकः ५८६
•• अलातम् दे १६
अवकाशयः ४६५
•• अवकीर्णी १३३
अवकृष्टः ३३०
अवक्षाणम् दे १६
अवक्षारणम् १०९
अवगयः ४६४
• अवगाहनम् १२१
अवज्ज्योतनम् ३१८
अवतापी (देशः) ६३०
अवतारणम् ९५
[illegible]
अवदानम् ३४३
अवधूतः ६४५
अवधूननम् ३३१
अवनेजनम् ३३९, ६२६
•– अवभृथः २४५, ४८८
अवसेचनम् ५०५
अवस्त्युः २४४
अवहननम् ३३२
अवहृतिः ३५०
अविवाक्यमहः ५४१
अवोक्षणम् ८४
•• अव्ययम् म १
•• अशनिः दे ७
अशौचम् ६१०
अश्मारोहणम् १६४
अश्रुमुखाः (पितरः) ६२४
•• अश्वः दे २०
अश्वमेधः ५२८
अश्वमेधपूताः ५३६
अश्ववाजनी २२
• अषाढा ५१०
अष्टका २०९
अष्टाचत्वारिंशकः १३५
अष्टाचत्वारिंशी १३५
• असङ्ग्रहः ६६१
असज्जनम् ६३७
असन्पांसवः ३०६
असपत्नाः ५११
असिका ४०३
असितग्रीवः दे७
असिपथाः ५३३
अस्थिसञ्चयनम् ६१३
• अस्तेयम् ६६१
• अहर्गणाः ४१२
• अहर्पतिः म ११
अहर्वित् ६१
अहल्या २०
• अहिंसा ६६१
• अहिर्बुध्न्यः ३१०
• अहीनाः ४१३
अहुतः २१२
अहोमुग्धः म ११
•• आकाशः म ३
आकेनिपः ४२
आक्षपादः ६५२
आक्ष्णवनम् ६३२
आख्याता ७२
आख्यानः ६५
आखुकरीषम् २२८
आखूत्करः २५८
•• आगन्तुः १९०
आगमः २७६
• आगूः ३५३
आगूर्तम् ३५३
आग्रयणम् ३७२
आग्रयणस्थाल्याद्या ४५३
आग्रहायणी २०८
आग्लागृधः ४८३
आग्नावैष्णवः ३९६
• आग्निमारुतः ३९७
आग्निमारुतम् ४८७
आग्निवारुणः ३९७
आग्निष्टोमिकः ५६
आग्निष्टोमिकी ३११
•– आग्नीध्रः २२६
आग्नीध्रम् २४१
आग्नीध्रम् (स्थानम्) २६८
आग्नीध्रागारम् ४४६
आग्नीध्रीयादिकम् २
• आग्नेयः १९
आग्नेयः २४४, ४
आग्नेयम् १२१, १२६
आग्न्याधेयिकी ३१०
आघारः ३४७
आघारणः ९१
आघारणा २८१
•• आङ्गिरसः २०
आङ्गिरसी ४४३
